
देवप्रयागस्थ-श्रीरघुनाथकीर्तिपरिसरस्य त्रैमासिकी वार्तापत्रिका

# रघुनाथवार्तावली

## भारतीयसेनासपर्या-विशेषाङ्कः

तृतीयवर्षम् ( २०१९ ) ११ अङ्कः  जनवरी-मार्च, २०१९




नानाविषयसम्बद्धाः नानारसपरिप्लुताः।
परिसरीयवार्तास्ताः वार्तावल्यां प्रकाशिताः॥

रघुनाथवार्तावली कृपया श्रीरघुनाथस्य प्रसरेत्।
दिशि दिशि प्रापयेदथ वार्ताः परिसरस्याभिनवाः॥

**प्रधानसम्पादकः**
प्रो. के.बी. सुब्बरायुडुः
( प्राचार्यः )

**सम्पादकौ**
प्रो. बनमालीबिश्वालः
डा. प्रफुल्लगडपालः

'रघुनाथवार्तावली'-सम्बद्धमभिप्रायम्, प्रकाशनयोग्याः कार्यक्रमवार्ताः च अधोलिखित-ई.मेल् सङ्केतेन प्रेषयन्तु-
srkvarta@gmail.com


परिसरस्य जालपुटेऽपि रघुनाथवार्तावली द्रष्टुं शक्यते-
website : www.srkcampus.org

देवप्रयागस्थ-श्रीरघुनाथकीर्तिपरिसरस्य त्रैमासिकी वार्तापत्रिका

# रघुनाथवार्तावली

प्रकाशकः
राष्ट्रियसंस्कृतसंस्थानम्
श्रीरघुनाथकीर्तिपरिसरः
देवप्रयागः, पौडी-गढवालः
उत्तराखण्डः-249 301
(दूरभाषः - 01378-266028)
email : srkcampus@gmail.com
website : www.srkcampus.org

## पुरोवाक्



परिसरीय-त्रैमासिक्या श्रीरघुनाथवार्तावल्या एकादशाङ्कः यथाकालं प्रकाश्यतां गच्छतीति संसूचयन् हर्षमनुभवामि। अयञ्च अङ्कः पुल्वामाऽऽक्रमणे हूतात्मभ्यः भारतीयसैनिकेभ्यः श्रद्धाञ्जलीः प्रदातुं भारतीय-सेना-सपर्या-विशेषाङ्करूपेण प्रकाशयित्वा गौरवमनुभवामः। अपरञ्च अयमङ्कः अन्ताराष्ट्रीय-राष्ट्रिय-सङ्गोष्ठीविशेषाङ्क इत्यपि कथयितुं शक्यते।

उल्लेखनीयमस्ति यत् परिसरे २८.०१.२०१९ तः ०४.०१.२०१९ दिनाङ्कं यावत्तथा १८.०२.१९ तः २३.०२.२०१९ दिनाङ्कं यावद् विविध-विभागीया अन्ताराष्ट्रीया राष्ट्रिया च सङ्गोष्ठ्यः समनुष्ठिताः। तदवसरे नैकेषां विभागानां विशिष्ट-व्याख्यानान्यपि समायोजितानि। अनेन विशेषाङ्कमाध्यमेन तेषां तेषां विशिष्टकार्यक्रमाणां विवरणं पाठकाः पठितुं शक्नुवन्ति। अन्येषां कार्यक्रमाणां विवरणमप्यत्र यथास्थानं प्रकाशितम्। अस्मिन्नङ्के परिसरीय-सदस्यानां मौलिकमनूदितं साहित्यमपि प्रकाश्यते। एवमेवास्मिन्नङ्के अन्ये च समे स्थायिनः स्तम्भाः यथास्थानं प्रकाशिताः सन्ति।


पत्रिकायाः सुन्दर-सम्पादनार्थं सम्पादकाभ्यां प्रो. बनमाली बिश्वाल-डा. प्रफुल्लगडपाल-महोदयाभ्यां साधुवादैः सभाजयित्वा विरमामि विस्तरात्।

**-आ नो भद्राः क्रतवो यन्तु विश्वतः-**

(Let noble thoughts come from every side)

के.बी. सुब्बरायुडुः
प्राचार्यः, श्रीरघुनाथकीर्तिपरिसरः, देवप्रयागः

## प्रतिस्पन्दः




श्रीरघुनाथवार्तावल्याः दशमाङ्कः आद्यन्तम् अवलोकितः। आचार्य-रामकरणशर्म-स्मृतिविशेषाङ्करूपेण प्रकाशितमिममङ्कं पठित्वा आनन्दिताः वयम्।

पूर्वाङ्कवदस्मिन्नङ्केऽपि समे स्थायिस्तम्भाः राराजन्ते। परन्तु स्मृत्यङ्कसम्बद्धपृष्ठानां किमपि वैशिष्ट्यमवश्यं वर्तते। 'तस्मै पुण्यात्मने नमः' तथा 'आचार्यरामकरमशर्मविरचितस्य सीमाख्यस्य संस्कृतोपन्यासस्य वैचारिकं परिदृश्य'मिति रचनाद्वयम् आचार्य-रामकरणशर्मणः स्मृतिं रोमन्थयितुमलमिति पत्रिकासम्पादकौ अभिनन्दनीयौ।

शुभेच्छुः
डा. ब्रजेन्द्रकुमारसिंहदेवः
श्रीभगवान्-दास-आदर्श-संस्कृत-महाविद्यालयः
हरिद्वारम्, उत्तराखण्डः

# सम्पादकीयम्

नववर्षात् समारभ्य वित्तीय-वत्सरान्तकम्।
वृत्तजातं पुरस्कृत्य नवीनोऽङ्कः प्रकाश्यते।१।

दिष्ट्या चैकादशाङ्कोऽयं विशेषाङ्कोऽभिधीयते।
भारतीय-सैनिकानां वैशिष्ट्येन महीयते।२।

राष्ट्रसेनासपर्याऽत्र श्रद्धया वै विधीयते।
हूतात्मनां स्मृतौ तेभ्यः श्रद्धाञ्जलिर्निवेद्यते।३।

सङ्गोष्ठीनामुदन्ताश्च बहुमानं प्रकाशिताः।
सङ्गोष्ठीय-विशेषाङ्क-संज्ञाऽप्यस्य सुयुज्यते।४।

एषोऽपि वसन्तः कालः सर्वकालेषु चोत्तमः।
वासन्तः विशेषाङ्कोऽयं सर्वाङ्केषु विशिष्यते।५।

गणतन्त्रदिवसोऽत्र सोत्साहं परिपालितः।
गणतन्त्रविशेषाङ्क-संज्ञाऽप्यस्योपयुज्यते।६।

एवं नैकविशेषाणां समाहारः समाहृतः।
विशिष्टविशेषाङ्कोऽयं पाठकेभ्यः समर्पितः।७।

विवरणञ्च पर्वणां यथास्थानमुट्टङ्कितम्।
तस्याख्यानं पत्रिकायां द्रष्टुमर्हन्ति वाचकाः।८।

नाट्यस्पर्धासु छात्रा वै केरलं प्रस्थिताः समे।
विजेतारश्च तत्र ये यथायोग्यं पुरस्कृताः।९।

मातृभाषादिवसोऽपि सोत्साहं परिपालितः।
मातृभाषासु काव्यानि प्रस्तुतानीह कानिचित्।१०।

आयोजिताश्च काश्चन सङ्गोष्ठ्योऽपि विभागशः।
व्याख्यानानि विशिष्टानि चायोजितानि कानिचित्।११।

वार्षिक्योऽपि परीक्षाश्च प्राक्-शास्त्रि-वर्गसंयुताः।
शान्तिपरक-रीत्या च समयेन सुसङ्गताः।१२।

अन्यद्यद्यत् कार्यजातं परिसरेऽत्र संवृतम्।
विवरणञ्च सम्बद्धं यथास्थानं प्रकाशितम्।१३।

पत्रिकायास्तरोन्नतिर्यथा भवेत्तदर्थिकाः।
आहूयन्ते प्रतिक्रियाः पाठकेभ्यश्च श्रद्धया।१४।

परिसरसदस्याश्च सहयोगाय प्रार्थिताः।
छात्राणां सहयोगोऽपि हृदयेन समर्थितः।१५।

भूयाच्छ्रेयस्करी लोके वार्तावली च सर्वदा।
संस्कृतेः रक्षणे चास्या योगदानं महीयताम्।१६।

-सम्पादकाः



रामो जायानुजाभ्याञ्च मुख्यद्वारि विराजते।
सकारात्मकशक्तिभ्यो बहिर्गन्तुं न यच्छति।।



गणपति-कपीशाभ्यां रघुनाथस्सुशोभते।
नकारात्मकशक्तिभ्यः प्रवेशाद्धि निषीधति।।

## तस्मै हूतात्मने नमः

( पुल्वामाऽऽक्रमणे हूतात्मभ्यः भारत-सैनिकेभ्यः श्रद्धाञ्जलिः )

-प्रो. बनमाली बिश्वालः

(१)

पुल्वामाऽऽक्रमणे ये ये हूतात्मानश्च सैनिकाः।
न्यूनीभवन्ति मे शब्दाः तेषां श्रद्धाञ्जलौ स्वकाः।१।

जीवन्तस्ते यथा वीराः जीवनान्ते तथैव ते।
रक्षकाः जीवने मर्त्ये प्राणान्ते रक्षका दिवि।२।

स्वागतं तच्छरीराणां विहितं देशवासिभिः।
क्रियते स्वागतं देवैः स्वर्गे पुनस्तदात्मनाम्।३।

हसन्तस्ते गतास्सर्वे रुदन्ति देशवासिनः।
स्वर्गे तु हसतां तेषां सहर्षं स्वागतं महत्।४।

आतङ्किनश्छले मग्नाः नपुंसकाश्च भीरवः।
नरके ते गमिष्यन्ति कातराः प्रतिवेशिनः।५।

ये च वीराः हताः युद्धे प्राप्य वीरोचितां गतिम्।
दातुं तत्परिवारेभ्यः प्रतिदाने किमस्ति नः?६।

किमश्रुबिन्दवस्तेषां समर्थाः क्षतिपूर्तये।
धन-संवेदनाश्चापि किं किं पूरयितुं क्षमाः?७।

कः क्षमः पितरं दातुं शिशवे स्तन्यपायिने।
नवोढायै कथं को वा सौभाग्यं दातुमर्हति?८।

पितृभ्यां कः सुतं दद्यात् युवानं  देशगौरवम्।
को वा ज्ञाति-कुटुम्बेभ्यो दायादं दातुमर्हति?९।

तादृशीर्महतीशक्तिस्तज्ज्ञातिभ्यः प्रदाय वै।
तांश्च शक्तिमतः कुर्यादीश्वरं प्रार्थयामहे।१०।

(२)

आतङ्किनोऽवगच्छेयुर्दुर्बलं भारतं नहि।
उपाया बहवस्सन्ति तेषां व्यापादनाय वै।११।

युक्तं प्रत्युत्तरं दत्तं प्रत्याक्रमणकामिभिः।
आतङ्किनश्शतं हताः भारतीयैश्च सैनिकैः।१२।

प्रमाणमिष्यते कैश्चिदातङ्किनो हताः कति।
सेनाशौर्ये ह्यविश्वासो देशद्रोहस्य सूचनम्।१३।

दृष्ट्वा साहसिकं वृत्तं शङ्किताः प्रतिवेशिनः।
अन्येभ्यश्चात्मरक्षायै साहाय्यं याचितं भयात्।१४।

अभिनन्दन-शौर्यन्तु साक्षात्कृतं समैर्जनैः।
आतङ्किनां गृहं गत्वा तांश्च हत्वा समागतः।१५।

तदभिनन्दनं देशे कृतं नु देशवासिभिः।
स्वास्थ्यमविगणय्यासौ देशसेवासु प्रस्थितः।१६।

वीरास्तत्सदृशो यत्र यतन्ते देशरक्षायै।
तत्र सुरक्षिताः नूनं समग्र-देशवासिनः।१७।

स्मर्यते कार्गिले युद्धे सेनाशौर्यं महत्तरम्।
आक्रमणमुरीक्षेत्रेऽप्यस्माभिर्नैव विस्मृतम्।१८।

पुल्वामापरिणामस्तु पाकिस्तानाय दुस्सहः।
प्रत्युत्तरप्रभावाच्च सन्तोषः परमोऽस्ति नः।१९।

भारतीया चमूर्धन्या धन्येयं भारतावनिः।
धन्या तद्देशसेवा वै धन्या भारतवासिनः।२०।

**अस्मान् सुरक्षितान् कर्तुं यो यो वीरगतिं गतः।
भारत-वरपुत्राय तस्मै हूतात्मने नमः।।**

## व्याकरणविभागीया अन्ताराष्ट्रिया सङ्गोष्ठी सम्पन्ना



उद्घाटनसत्रे विशिष्टातिथिः प्रो. विजयपालशास्त्री प्राचार्येण सम्मान्यते

व्याकरणविभागीया द्विदिवसीया अन्ताराष्ट्रिया सङ्गोष्ठी (२८.०१.२०१९ तः २९.०१.२०१९ दिनाङ्कं यावत्) परिसरे समनुष्ठिता। संगोष्ठ्याः केन्द्रीयो विषयः आसीत्– 'समासशक्तिसिद्धान्तस्य परावर्तनबिन्दवः' (Turning points of the concept of Samasa-shakti)। तत्क्रमे २८.०१.२०१९ तमे दिनाङ्के पूर्वाह्ले ११.०० वादने परिसरे अस्याः सङ्गोष्ठ्याः उद्घाटनसत्रं सम्पन्नम्। सम्मान्यैः अतिथिभिः आदौ दीपप्रज्वालनं वाग्देवी-माल्यार्पणं च विहितम्। तदनु डा. शैलेन्द्रप्रसादउनियालेन वैदिक-मङ्गलाचरणं प्रस्तुतम्। ततः व्याकरणविभागीयेन प्राध्यापकेन श्रीश्रीओमशर्मणा स्वागतभाषणं प्रस्तुतम्। राङ्कवादि-प्रदानपुरस्सरम् अतिथि-सम्माननं परिसर-प्राचार्य-महोदयेन व्याकरण-विभागाध्यक्षेण च विहितम्। अस्मिन् अवसरे जर्मनदेशीयेन भक्तकृष्णेन (क्रिस्टीयन् लोअफर-महोदयेन) आङ्ग्ल-प्रस्तावना प्रस्तुता। प्रास्ताविकं विषयप्रवर्तनञ्च व्याकरण-विभागाध्यक्षेण प्रो. बनमालीबिश्वालेन कृतम्। अत्र विशिष्टातिथिभाषणं गरलीस्थ-एकलव्य-परिसरस्य साहित्यविभागाध्यक्षेण प्रो. विजयपाल-शास्त्री-महोदयेन प्रस्तुतम्। विशिष्टव्याख्यानञ्च काशी-हिन्दू-विश्वविद्यालयस्य आचार्येण डा. ब्रजभूषण-ओझामहोदयेन प्रस्तुतम्। श्रीप्रतापसिंह-महोदयेन मुख्यातिथिरूपेण उद्बोधनं कृतम्। एतदवसरे रघुनाथवार्तावल्याः नवमाङ्कस्य लोकार्पणमतिथिभिः सम्पादकैश्च विहितम्। ततः अध्यक्षीयमुद्बोधनं परिसर-प्राचार्येण प्रो. के.बी. सुब्बरायुडु-महोदयेन कृतम्। अन्ते च, धन्यवादज्ञापनं व्याकरणविभागीय-प्राध्यापकेन डा. नीतेशद्विवेदिना कृतम्। अस्य च उद्घाटन-सत्रस्य सञ्चालनं डा. मुकेशकुमारेण कृतम्।

अस्याः सङ्गोष्ठ्याः विविध-पत्रवाचनसत्रेषु हरिद्वारस्थ-उत्तराखण्ड-संस्कृत-विश्वविद्यालयस्य व्याकरणविभागाध्यक्षेण प्रो. शैलेशतिवारी-महोदयेन प्रथमे सत्रे, सीताराम-आदर्श-संस्कृत-महाविद्यालयस्य आचार्येण डा. शशीभूषणमिश्रमहोदयेन द्वितीये सत्रे तथा परिसरस्य न्यायविभागाध्यक्षेण डा. आर. बालगुरुगन्-महोदयेन तृतीये सत्रे च सत्राध्यक्ष्यदायित्वं निर्व्यूढम्। एवम् एषु पत्रवाचनसत्रेषु डा. नीतेशद्विवेदि-श्रीओमशर्म-डा. शैलेन्द्र-प्रसाद-उनियालैश्च सत्रसञ्चालनं कृतम्। एषु सत्रेषु डा. वेदव्रतः, डा. आर. बालमुरुगनः, डा. वीरेन्द्रसिंहबर्त्वालः, डा. नीतेशद्विवेदी, श्रीश्रीओमशर्मा, डा. शैलेन्द्रप्रसादउनियालः, डा. सञ्जीवभट्टः, डा. दिनेशचन्द्रपाण्डेयः, श्रीरामसुमेरपाण्डेयः, श्रीहरीशडङ्गवालः, श्रीकिशोरकुमारः, श्रीशुभमः, श्रीबालकृष्णसेमवालः, श्रीरोहितकुमारः, श्रीगगनः प्रो. बनमालीबिश्वालश्चेत्यादिभिः शोधपत्राणि प्रस्तुतानि।



विषयप्रवर्तनं प्रकुर्वाणः प्रो. बनमालीबिश्वालः

२९.०१.२०१९ तमे दिनाङ्के अपराह्ने ३.०० वादने चास्याः अन्ताराष्ट्रिय-सङ्गोष्ठ्याः सम्पूर्तिसत्रम् आयोजितम्। परिसरस्य प्राचार्य-महोदयानामाध्यक्ष्ये सम्पन्नेऽस्मिन् समापन-कार्यक्रमे डा. शशिभूषणमिश्रेण विशिष्टातिथिरूपेण, श्रीमोहनेन मुख्यातिथिरूपेण च उद्बोधनं कृतम्। अत्र स्वागतभाषणं डा. प्रफुल्लगडपालेन, प्रतिवेदनप्रस्तुतिः श्रीश्रीओमशर्मणा तथा सञ्चालनं डा. नीतेशद्विवेदिना कृतम्। अन्ते च व्याकरणविभागाध्यक्षेण प्रो. बनमाली-बिश्वालेन संगोष्ठ्याः सामग्रिकं धन्यवादज्ञापनं कृतम्।

## प्रास्ताविकम्

अष्टाध्याय्यां पाणिनिना यद्यप्यनेकेषां पारिभाषिक-शब्दानां लक्षणानि कृतानि तथापि अनेके शब्दास्तत्र पारिभाषिकेऽर्थे प्रयुक्ताः सन्तोऽपि परिभाषिताः न वर्तन्ते। पूर्व-पाणिनीय-पारिभाषिकशब्दानां लक्षणानि पाणिनेः पूर्वजैः वैयाकरणैः स्व-स्वशास्त्रेषु प्रदत्तानि। अतस्तेषां पुनः परिभाषाविधाने पाणिनिः शिथिलो दृश्यते। समासोऽपि कश्चित्पूर्व-पाणिनीयः पारिभाषिक-शब्दोऽस्ति। अतस्तस्य साक्षाल्लक्षणं पाणिनिना अष्टाध्याय्यां न विहितम्। परन्तु पाणिनीयसरणिमनुसृत्य तस्य किञ्चिल्लक्षणं कर्तुं शक्यते।

समासानां विभजनमपि विभिन्नैः शास्त्रकारैः भिन्नया भिन्नया प्रणाल्या कृतम्। तेषु विभागेषु अव्ययीभाव-तत्पुरुष-द्वन्द्व-बहुव्रीह्यात्मकः चतुर्धा-विभागः प्राचीनतमः प्रसिद्धतमश्चास्ति। एतेषां चतुर्विधानां समासानां स्वरूपलक्षणानि पतञ्जलिना एवं कृतानि–पूर्वपदार्थप्रधानोऽव्ययीभावः, उत्तरपदार्थप्रधानस्तत्पुरुषः, उभयपदार्थप्रधानो द्वन्द्वः, अन्यपदार्थप्रधानो बहुव्रीहिश्चेति।

भट्टोजिदीक्षितेन वैयाकरण-सिद्धान्तकारिकायां (वैयाकरणमतोन्मज्जन्यां) एवं च कौण्डभट्टेन वैयाकरणभूषणे समासस्य पारम्परिकश्चतुर्धा-विभागः समालोचितः। समासस्य बाह्यस्वरूपमभिलक्ष्य भट्टोजिदीक्षितेन समासानां किञ्चिदन्यथा विभजनं प्रस्तुतम्। तद्यथा–

**सुपां सुपा तिङा नाम्ना धातुनाऽथ तिङां तिङा।**
**सुबन्तेनेति विज्ञेयः समासः षड्विधो बुधैः।।**



आंग्लप्रस्तावनां प्रस्तुवन् शर्मण्यदेशीयः क्रिस्टीयन् लोअफरः

समासार्थः शक्त्याऽवगम्यते इति वैयाकरणा आमनन्ति। किन्तु नैयायिकाः तथा मीमांसकेष्वेके लक्षणयैव समासार्थोऽवगम्यते इति सयुक्तिकमुपस्थापयन्ति। वैयाकरणैः स्व-स्वग्रन्थेषु समासशक्तेः प्रतिनिधिभूता अनेके शब्दाः प्रयुक्ताः। यथा समूहशक्तिः, समुदायशक्तिः, अतिरिक्तशक्तिः, अखण्डशक्तिः, विशिष्टशक्तिः, क्लृप्तशक्तिः, एकशक्तिः तथा स्वतन्त्रशक्तिश्च। पक्षान्तरे नैयायिकैः मीमांसकैरपि विभिन्न-समासेषु भिन्ना भिन्ना लक्षणाऽङ्गीकृता – पद-लक्षणा, वाक्य-लक्षणा, समुदाय-लक्षणा, समूह-लक्षणा, साहित्य-लक्षणा, विशिष्ट-लक्षणा, सम्बन्धलक्षणा, शक्यसम्बन्ध-लक्षणा, सामीप्य-लक्षणा, प्राशस्त्य-लक्षणा, जहत्स्वार्थ-लक्षणा, अजहत्स्वार्थ-लक्षणा, निरूढ-लक्षणा, लक्षित-लक्षणा चेति।

एवमत्र स्थूलरूपेण पक्षद्वयमवलोक्यते। एकतः लक्षणावादिनः नैयायिक-मीमांसकाः ये समासे शक्तिं नाङ्गीकुर्वन्ति। पक्षान्तरे समुदायशक्तिवादिनः वैयाकरणा समासे विशिष्टां शक्तिमङ्गीकुर्वन्ति। किन्तु प्रसङ्गेऽस्मिन् नैयायिक-मार्गमनुसरतां केषाञ्चन वैयाकरणानां कैयट-हरदत्तादीनामपि वर्गेऽस्मिन् परिगणनमुचितं प्रतिभाति। पक्षान्तरे समासे शक्तिमिच्छतां कुमारिलभट्टसदृशानां केषाञ्चन मीमांसकानां वैयाकरणकोटौ अन्तर्भावः समीचीनः प्रतीयते। बहुव्रीहि-समासप्रसङ्गे एकस्मिन्नेव कोटौ स्थापितानां नैयायिक-मीमांसकानामपि परस्परं मतानैक्यं परिलक्ष्यते। नैयायिकाः बहुव्रीहौ पद-लक्षणां स्वीकुर्वन्ति परन्तु मीमांसका अत्र वाक्यलक्षणामभिप्रयन्ति। नैयायिकेषु गङ्गेशः किञ्चिदन्यथा चिन्तयति। सः सर्वत्र निरूढलक्षणां समर्थयति।




विषयविमर्शं कुर्वन्तः मञ्चस्थाः विद्वांसः

समासशक्तिमधिकृत्य शास्त्रकारेषु यावन्तो विवादाः सन्ति तदनुरुध्य विषयेऽस्मिन् कस्याश्चन शोधात्मिकायाः परिचर्चायाः कृते महानवकाशोऽस्ति। पूर्वोक्तेषु त्रिषु सम्प्रदायेषु विषयमेनमधिकृत्य कदा कानि परिवर्तनानि अभवन्, तथा सिद्धान्तेऽस्मिन् कस्य समये कस्मिंश्च ग्रन्थे कीदृशः क्रमविकासः सञ्जात इति विचारयितुम् अस्याः सङ्गोष्ठ्या अवतरणम्। यद्यपि समासशक्तेः क्रमविकास-प्रसङ्गे लक्षणावादिनः नैयायिक-मीमांसकाः स्वतः पृथक्कृतास्तथापि तन्मतोपस्थापनं विना सैद्धान्तिकमतस्योपस्थापनं, प्रतिपादनं च सम्यक्तया कर्तुं न शक्यते इति धिया प्रसङ्गतस्तयोः सम्प्रदाययोः विचारः अपि यथायोग्यं प्रस्तुतः। नैयायिकेषु केवलं नव्या एव स्व-स्वग्रन्थेषु समासार्थविषये विचारान् प्रस्तुवन्ति। नव्येष्वपि गङ्गेश-जगदीशयोरवदानमुल्लेखनीयं वर्तते।

वस्तुतो विषयोऽयं महान्व्यापकः। एतादृश्यां सङ्गोष्ठ्यां इयता महता विषयेण सह सर्वथा न्यायं कर्तुं न शक्यते इति वयम् अस्माकं सीमानमपि जानीमः। तथापि समासशक्तेः परिवर्तनबिन्दवोऽत्र साङ्गोपाङ्गं विचारिताः।

## पद्यमयी प्रस्तावना

**समासार्थः कथं बोध्यः शक्त्या लक्षणयाऽपि वा।**
**प्रवर्तते च शास्त्रेषु विचारो विषये महान्।१।**

**नैयायिकैः प्रसङ्गेऽस्मिन् लक्षणाऽङ्गीकृता मुदा।**
**वैयाकरणकोटौ तु विशिष्टा शक्तिरिष्यते।२।**

**नामान्तराणि तच्छक्तेः प्रसिद्ध्यन्ति स्वरूपतः।**
**क्वचिच्छमासशक्तिः सा समुदायाभिधाऽपि वा।३।**

**क्वचिदखण्डशक्तिस्सा चातिरिक्ता क्वचित् पुनः।**
**क्वचित्क्लृप्ता स्वतन्त्रा वा समूहशक्तिरेव वा।४।**

**प्रसिद्ध्यतः लक्षणे द्वे पदवाक्याभिधे पुनः।**
**समुदायसमूहाभ्यां साहित्य-लक्षणा क्वचित्।५।**

**विशिष्ट-लक्षणा काचित् सम्बन्धलक्षणाऽपरा।**
**लक्षित-लक्षणा काचित् निरूढाऽपि क्वचित्पुनः।६।**

**लक्षणा शक्यसम्बद्धा सामीप्य-लक्षणाऽपि वा।**
**जहत्स्वार्थाजहत्स्वार्थे प्राशस्त्य-लक्षणा क्वचित्।७।**

**तत्र मीमांसकैः प्रायो वाक्य-लक्षणा सम्मता।**
**एवं समासार्थे शक्तिर्लक्षणा च विशिष्यते।८।**

**इमं विषयमादाय सङ्गोष्ठीयमायोजिता।**
**व्यापकताप्रदानाय सा चान्ताराष्ट्रिया पुनः।९।**

**भारताद्विदेशाच्चापि विद्वांसोऽत्र समुत्सुकाः।**
**सप्रश्रयं निवेद्यन्ते भागग्रहणकामिनः।१०।**

## साहित्यविभागीया अन्ताराष्ट्रिया संगोष्ठी समायोजिता

श्रीरघुनाथकीर्तिपरिसरस्य साहित्यविभागीया द्विदिवसीया अन्ताराष्ट्रिया सङ्गोष्ठी ३०.०१.२०१९ तः ३१.०१.२०१९ दिनाङ्कं यावत् प्रावर्तत। अस्याः अन्ताराष्ट्रियायाः सङ्गोष्ठ्याः केन्द्रीयो विषयः आसीत्–'संस्कृत-साहित्ये बौद्धपरम्परायाः योगदानम्' (Contribution of Buddhist tradition to Sanskrit Literature) इति। अयं विषयः संस्कृतसाहित्ये प्रायः अस्पृष्टो वर्तते। अतः अतीव प्रासङ्गिकोऽयं विषयः वर्तते।



उद्घाटनसत्रस्य किञ्चन दृश्यम्

३०.०१.२०१९ तमे दिनाङ्के परिसरप्राचार्यस्य प्रो. के.बी. सुब्बरायुडुमहोदयस्य आध्यक्ष्ये अस्याः सङ्गोष्ठ्याः उद्घाटनकार्यक्रमः परिसरे सम्पन्नः। अस्मिन् उद्घाटनसत्रे मुख्यातिथिरूपेण राष्ट्रियसंस्कृतसंस्थानस्य हिमाचलप्रदेशस्य बलाहरस्थस्य वेदव्यासपरिसरस्य साहित्यविभागाध्यक्षः प्रो. विजयपालशास्त्रिमहोदयः समुपस्थितः। अवसरेऽस्मिन् सारस्वतातिथित्वेन हरिद्वारस्थस्य भगवान्दास-आदर्शसंस्कृतमहाविद्यालयस्य साहित्यविभागाध्यक्षः डा. निरञ्जनमिश्रमहोदयः सभां शोभितवान्। अस्याः अन्ताराष्ट्रियायाः सङ्गोष्ठ्याः समन्वयकः आसीत् परिसरस्य साहित्य-विभागाध्यक्षः डा. कृपाशङ्करशर्मा तथा सङ्गोष्ठीसंयोजकः च डा. प्रफुल्लगडपालः। अवसरेऽस्मिन् सर्वादौ वैदिकलौकिकमङ्गलाचरणे प्रस्तुतेऽभवताम्। ततश्च स्वागतभाषणं सङ्गोष्ठीसमन्वयकेन डा. कृपाशङ्करशर्ममहोदयेन विहितम्। सङ्गोष्ठीप्रतिवेदनं डा. प्रफुल्लगडपाल-महोदयेन कृतम्। ततः प्रो. विजयपालशास्त्रिमहोदयः बीजभाषणं प्रस्तूय सभायां शोधप्रविधेः नवीनाम् अवधारणाम् उपस्थापितवान्। डा. निरञ्जनमिश्रमहोदयः बौद्धसंस्कृतसाहित्यस्य सन्दर्भान् प्रस्तुवन् अतीव रञ्जकं भाषणं प्रदत्तवान्। ततश्च पञ्च शोधपत्रवाचनसत्राणि प्रचलितानि, यत्र डा. निरञ्जनमिश्रः, प्रो. बनमालीबिश्वालः, प्रो. रामलखनपाण्डेयः, डा. प्रफुल्लगडपालः, डा. कृपाशङ्करशर्मा च सत्राध्यक्षतां विहितवन्तः।



प्रमाणपत्रं वितरन्तः मञ्चस्थाः विद्वांसः

३१.०१.२०१९ तमे दिनाङ्के प्रो. के.बी. सुब्बरायुडुमहोदयस्य आध्यक्ष्ये सम्पन्ने समापनसत्रे मुख्यातिथिः राष्ट्रियसंस्कृतसंस्थानस्य प्रो. रामलखनपाण्डेयः साहित्यसङ्कायाध्यक्षः, (लखनऊ-परिसरः, उ.प्र.) आसीत्। सारस्वतातिथित्वेन परिसरस्य व्याकरणविभागाध्यक्षः सभाम् अलमकरोत्। अन्याभिः औपचारिकताभिः सह अस्मिन् सत्रे शोधपत्रवाचकेभ्यः सर्वेभ्यः प्रमाणपत्रवितरणमपि अभवत्। प्रायः १० विश्वविद्यालयेभ्यः १० प्रदेशेभ्यश्च अत्र शोधपत्रवाचकाः समुपस्थिताः। एवमियं सङ्गोष्ठी सफलतामभजत्।

## ॥ प्रास्ताविकम् ॥

संस्कृतवाङ्मये नैकेषु विषयेषु, शास्त्रेषु दर्शनेषु तथा विविधासु विधासु उपविधासु च साहित्यं विरचितं वर्तते। अत्र वैदिकधर्मेण सह बौद्धजैनधर्मयोरपि साहित्यम् उपनिबद्धं वर्तते। विदितमेव यद् जैनाचार्याणां कवीनां च संस्कृतसाहित्यपरम्परायाम् अप्रतिमं योगदानं विद्यते इति। एवमेव नैके बौद्धकवयः आचार्याः च संस्कृतेन साहित्यप्रणयनं कृत्वा संस्कृतवाङ्मयं समेधितवन्तः। बौद्धकवयः विशेषतः भगवतो बुद्धस्य चरितविषये दर्शनविषये च स्व-स्वरचनासु वर्णनं प्रस्तुतवन्तः। वयं बौद्धकाव्यकृतीः भगवतो बुद्धस्य व्यक्तित्वस्य तद्धर्मस्य च साकारं स्वरूपं कथयितुं शक्नुमः, यतोहि एतेषु काव्येषु उभेऽपि पूर्णतः प्रतिफलिते जाते। वस्तुतः शास्त्रं 'कटुकौषधिवद्' भवति, यस्य आस्वादनं साहित्यमाध्यमेन सुकरं भवति। प्रायशः समस्ताः बौद्धकाव्यकृतयः बुद्धविचाराणां सिद्धान्तानां च स्वरूपभूताः सन्ति। बुद्धवचनानां परवर्तिनि संस्कृतसाहित्ये व्यापकः प्रभावः जातः। यद्यपि भगवता बुद्धेन जनभाषायां मागध्यां (पाल्यां) धर्मदेशनाः प्रदत्ताः, किन्तु परवर्तिनः बौद्धकवयः आचार्याः च दार्शनिकतत्त्व-प्रसाराय संस्कृतस्य आश्रयमगृह्णन्। विशेषरूपेण बौद्धधर्मस्य महायानपरम्परा संस्कृतं स्वीचकार। फलतः संस्कृतमाध्यमेन विपुला साहित्यरचना सञ्जाता, बुद्धधर्मस्य प्रचारश्च अभवत्। प्रकारान्तरेण संस्कृतस्य अभिवृद्धये एव कल्पितमेतत् साहित्यम्। प्रसङ्गतः बौद्धसंस्कृतसाहित्ये बौद्धराजानां, महापुरुषाणां श्रेष्ठविभूतीनां चापि वर्णनं सञ्जातं वर्तते।

बुद्धानुयायिभिः मनीषीभिः कविभिश्च संस्कृतभाषां स्वकाव्यरचनाकर्मणो माध्यमं विधाय द्विधा साहित्यं विरचितम्–१. विशुद्ध-संस्कृतं, २. मिश्रित-संस्कृतं च। अत्र एकतः अश्वघोष-शान्तिदेवसदृशाः महान्तः कवयो, दिङ्नाग-धर्मकीर्ति-समाः दार्शनिकाश्च विशुद्ध-संस्कृतेन साहित्यरचनाः अकुर्वन्, अपरतः मिश्रितसंस्कृतेन वैपुल्यसूत्र-जातक-अवदानादि-साहित्यं विरचितमभवत्। अश्वघोषकालीने भारते गृहे-गृहे तस्य रचनानां गानं जायते स्म। हुएन्साङ्ग-मतानुसारेण अश्वघोषः, आर्यदेवः, नागार्जुनः कुमारलातश्चेति इमे साहित्याकाशस्य 'देदीप्यमानाः चत्वारः सूर्याः' सन्ति, यैः विश्वं प्रकाशितम्। अत्र महाकाव्यानि रूपकाणि गद्यसाहित्यं चम्पूकाव्यानि च रचितानि अभूवन्। बुद्धचरितं, सौन्दरनन्दं, पद्यचूडामणिः, कल्पनामण्डितिका, कप्फिणाभ्युदयं बोधिसत्त्वावदानमाला चेत्यादीनि नैकानि काव्यानि अत्र समुपलभ्यन्ते। बौद्धसंस्कृतसाहित्ये तु असंख्याकानि काव्यानि समुपलभ्यन्ते। बौद्धसंस्कृतस्तोत्राणि स्तवाः च अत्यन्तं रम्याः सन्ति।

## ज्योतिषविभागीया अन्ताराष्ट्रिया सङ्गोष्ठी सम्पन्ना

'देववास्तुविमर्शः' इत्यमुं विश्वव्यापिनम् अनुसन्धेयविषयमधिकृत्य राष्ट्रियसंस्कृतसंस्थानस्य श्रीरघुनाथकीर्तिपरिसरस्य ज्योतिषविभागेन ऐषमः १-२ फरवरी, २०१९ इत्येतयोः दिनाङ्कयोः द्विदिवसीयायाः अन्ताराष्ट्रियसङ्गोष्ठ्याः आयोजनं परिसरच्छात्रवासस्य सभागारे विहितम्, यत्र विश्वविश्रुताः नैके विद्वांसः आगत्य देववास्तोः विविधेषु आयामेषु मन्थनमकार्षुः।


उद्घाटनसत्रे मुख्यातिथिं सम्मानयन्तः प्राचार्यः अन्ये च

अस्याः सङ्गोष्ठ्याः उद्घाटनसत्रे मुख्यातिथिरूपेण समुपस्थितः आसीत् नवदेहलीस्थस्य श्री.ला.ब.शा.रा.सं.विद्यापीठस्य वास्तुविभागस्य अध्यक्षः प्रसिद्धः ज्योतिर्विद् प्रो. देवीप्रसादत्रिपाठी एवञ्च विशिष्टातिथिपदमलमकरोत् विश्वप्रसिद्धः वास्तुविद् आचार्यः मनोजजुयालः। आचार्यः मनोजजुयालः स्वीयव्याख्याने अत्यन्तं सरलशैल्या भारतीयवास्तुशास्त्रस्य अरबदेशेषु सम्मानविषये तथा च वैश्विकप्रचारविषये नैकानि तथ्यानि प्रस्तूय वास्तु-ज्योतिश्शास्त्रयोः आधुनिककाले समाजाय आवश्यकतामपि प्रत्यपादयत्। अस्य सत्रस्य अध्यक्षेन परिसरप्राचार्येण प्रो. के.बी.सुब्बरायुडुवर्येण समागतानाम् अतिथीनां सम्माननं कृतम्। सङ्गोष्ठ्याः प्रास्ताविकभाषणे ज्योतिषविभागप्राध्यापकः डा. सुरेशशर्मा देववास्तुपरम्परायाः ऐतिहासिकस्वरूपं वर्णयित्वा सङ्गोष्ठ्याः प्रयोजनं सविस्तरं न्यरूपयत्। सङ्गोष्ठीसंयोजकेषु अन्यतमः डा. मुकेशकुमारः स्वागतभाषणं सञ्चालनञ्चाकरोत्।

अस्मिन् एव सत्रे 'वास्तुशास्त्रस्य लोकोपयोगित्वम्' इत्यस्मिन् विषये विशिष्टं व्याख्यानमकरोत् आचार्यः प्रो. देवीप्रसादत्रिपाठी। अस्मिन् व्याख्याने न केवलं वास्तोः शास्त्रीयसिद्धान्ताः एव एभिः निरूपिताः, अपि तु वैज्ञानिकपक्षानाधृत्यापि वास्तुशास्त्रीयसिद्धान्तानां विश्वस्य कृते योगदानं सविस्तरं वर्णितम्। सङ्गोष्ठ्याः विविधसत्रेषु अध्यक्षाः आसन्-प्रसिद्धो ज्योदिर्विद् प्रो. वासुदेवशर्मा, प्रो. राकेशभट्टः, डा. मुकेशकुमारश्चेति। एतेषु सत्रेषु विविधप्रान्तेभ्यः समागताः विद्वांसः परिसरस्य विविधविभागीयाः विद्वांसश्च वैदेशिकाश्चानुसन्धातारः छात्राः देववास्तोः विविधविषयेषु स्वीयवैदुष्यपूर्णशोधपत्राणि उपास्थापयन्। सङ्गोष्ठ्याः विविधसत्राणां सञ्चालनं परिसरीयाः विद्वांसः साहित्यविभागाध्यक्षः डा. कृपाशङ्करशर्मा, डा. पङ्कजकोटियालः, डा. शैलेन्द्रप्रसादउनियालः, डा. वीरेन्द्रसिंहबर्त्वालः, डा. नीतेशश्चाकुर्वन्।


मुख्यवक्तृभाषणं कुर्वन् प्रो. राकेशभट्टः

सङ्गोष्ठ्याः सम्पूर्तिसत्रस्य आध्यक्ष्यं वहता परिसरप्राचार्येण प्रो. के.बी.सुब्बरायुडुवर्येण समागतानाम् अतिथिनां राङ्कवादिप्रदानेन स्वागतं विहितम्। अस्मिन् सत्रे संस्थानस्य श्रीरणवीरपरिसरस्य प्राचार्यः प्रो. वासुदेवशर्मा मुख्यातिथिपदम्, हे.न.ब.गढवालविश्वविद्यालयस्य इतिहासविभागाध्यक्षः प्रो. राकेशभट्टश्च विशिष्टातिथिपदम् अलङ्कृतवान्। अतिथिपरिचयः परिसरस्य वेदविभागप्राध्यापकेन डा. शैलेन्द्रउनियालवर्येण कृतः। प्रतिवेदनं डा. सुरेशशर्मणा प्रस्तुतम्। डा. मुकेशकुमारेण अभ्यागतेभ्यः, शोधपत्रवाचकेभ्यः विद्वद्भ्यः, सङ्गोष्ठ्यां साफल्ये कारणीभूतेभ्यश्च सर्वेभ्यः कार्तज्ञ्यं विनिवेदितम्।

## ।।प्रास्ताविकम्।।


सङ्गोष्ठ्यां प्रमाणपत्रं प्रयच्छन्तः विद्वांसः

सकलचराचरजगतः समुत्पत्तौ कारणीभूतस्य परमेश्वरस्य साकाररूपस्य स्तुत्यर्थं सर्वोऽपि जनः प्रत्यहं प्रवर्तते। यदर्थं गृह-ग्राम-नगरादिषु विशिष्टस्थलेषु देवालयनिर्माणेन विशिष्टायाः सांस्कृतिकपरम्पराया एव समारम्भमकार्षुः अस्मत्पूर्वजाः ऋषयः। देवालयनिर्माणं कथं विधेयमित्येतदर्थं ज्योतिश्शास्त्रस्यैव संहितास्कन्धो अन्तर्भूतः। एकोंऽशः वास्तुशास्त्रनाम्ना प्रावर्तितः दैवज्ञप्रवरैः। वास्तुशास्त्रेऽस्मिन् न केवलं गृहनिर्माणविधानं, प्रासादविधानं, विविधप्रकारकप्रासादलक्षणादिकमेव निरूपितम्, अपितु देवालयनिर्माणं, देववासवैशिष्ट्यं, देवतागृहे वास्तुपुरुषलक्षणं, देवप्रतिमालक्षणं, देवगृहनिर्माणादीनां सूक्ष्मातिसूक्ष्मसिद्धान्ताः अपि सुनिरूपिताः वर्तन्ते। कालान्तरे च विविधानुसन्धानैः वास्तुशास्त्रे नानाग्रन्थरचना प्रायोगिकाध्ययनं चाभवत् । तस्मात् स्वतन्त्ररूपेण वास्तुशास्त्रेण समग्रेऽपि विश्वे महनीयस्थानं लब्धं वर्तते ।

ब्रह्मणः सकाशात् समुत्पन्ना वास्तुविद्येयं गर्गादिमुनिभिः महता श्रमेण रक्षिता सती अस्मत्पुरतः सम्प्राप्ता इति आचार्यवराहमिहिरः निरूपयति-'वास्तुज्ञानमथातः कमलभवान्मुनिपरम्परायातम्। क्रियतेऽधुना मयेदं विदग्धसांवत्सरप्रीत्यै।।' यद्यपि देशस्य तत्तद्राज्ये राजाश्रये वा निर्मिताः वास्तुशास्त्रीयग्रन्थाः तत्तत्क्षेत्रस्य देवगृहनिर्माणपद्धतिं द्योतयन्ति, तथापि सर्वसामान्याः सिद्धान्ताः सर्वग्रन्थेषूपलभ्यन्त एव। देववास्तोः दार्शनिक-आध्यात्मिक-सांस्कृतिकाधाराः के? देववास्तोः मय-विश्वकर्मादिपरम्पराः काः? कश्च तत्र भेदः? देववास्तोः विविधशैल्यनुसारं शिखर-मण्डप-गर्भगृह-प्रतिमादिनिर्माणं कथं कया वा रीत्या स्यात्? इत्यादिविविधसंशयानां निवारणाय जिज्ञासूनाम् अनुसन्धित्सूनां च समेषामपि जिज्ञासासमाधानाय देववास्तुविषयकः विमर्शः महदुपकारकः भवेदित्यनुभूय 'देववास्तुविमर्शः' इति विषये अन्ताराष्ट्रिया सङ्गोष्ठी समायोजिता।

आधुनिकसंस्कृतसाहित्येऽपि पुष्कलमात्रायां काव्यानि रचितानि अभूवन्। अपरत्र मिश्रितसंस्कृतेनापि अतीव मञ्जुलं साहित्यं विरचितमभवत्। इदं मिश्रितसंस्कृतं पालिसंस्कृत-मिश्रितत्वात् 'बौद्ध-मिश्रित-संस्कृत-साहित्यम्' (Buddhist Hybrid Sanskrit Literature) इति वैदेशिकैः अनुसन्धातृभिः विद्वद्भिश्च कथितम्। इदं च बौद्धसंस्कृतसाहित्यम् अत्यन्तं विशालं विस्तृतं च वर्तते। अस्य साहित्यस्य उपलब्धिः द्वादश अङ्गेषु प्राप्यते।



विषयप्रवर्तनं कुर्वन् डा. प्रफुल्लगडपालः

तद्यथा–

**सूत्रं गेयं व्याकरणं गाथोदानावदानकम्।**
**इतिवृत्तकं निदानं वैपुल्यं च सजातकम्।**
**उपदेशाद्भुतौ धर्मौ द्वादशाङ्गमिदं वचः।।**

बौद्धसंस्कृतकविभिः एकस्मिन् पक्षे स्वकाव्यवीणायां दार्शनिकानि धार्मिकानि च गीतानि झंकृत्य काव्यमर्मज्ञरसिकानां चित्तानि रञ्जितानि, अपरस्मिन् पक्षे साहित्यिक-सांस्कृतिक-ऐतिहासिकादिदृष्ट्या स्वीया यशोदुन्दुभिः अपि सन्निनादिता। साहित्येऽस्मिन् आलङ्कारिक-तत्त्वानि स्पष्टतया अवलोकयितुं शक्यन्ते। भारतदेशस्य बहिः सुदूरवर्तिषु देशेष्वपि एतानि द्वादश अङ्गानि आश्रित्य कल्याणमयस्य बौद्धधर्मस्य कीर्तिपताकाम् उत्तोलयित्वा विश्वस्य सम्मुखं सम्यक्सम्बुद्धस्य अनुपमजीवनगाथां, तदुदात्तचरितं लौकिकालौकिकगुणानाम् आदर्शं चोपस्थाप्य बौद्धकवयो भारतमातुः मस्तकं उन्नीतवन्तः। किन्तु, अहो! दुःखमिदं यत् बुद्धोद्भावितं बुद्धधर्ममिव, बौद्धकाव्यकृतयोऽपि अस्यां भारतभूमौ समुचिततया सम्मानभाजः भवितुं नाशक्नुवन्, यस्मात् कारणाद् वयं बौद्धकाव्यकाराणां कवीनां च वचनामृतेभ्यः वञ्चितप्रायाः जाताः। एकम् आर्यमञ्जुश्रीमूलकल्पं विहाय एकोऽपि बौद्धग्रन्थः अस्य देशस्य परिधौ नैव लब्धः। साम्प्रतं यत्किमपि बौद्धसाहित्यं समुपलभ्यते, तस्य सर्वमपि श्रेयः भारतविद्यासमुपासकेभ्यः वैदेशिकविद्वद्भ्यः एव गच्छति। तेषामेव महता प्रयत्नसमुच्चयेन अज्ञानतिमिरविलीनबौद्धग्रन्थानां रक्षा भवितुम् अशक्नोत्, तेष्वपि कतिपये ग्रन्थाः एवं प्राकाश्यं गताः। एतेषां ग्रन्थानां प्रकाशनानन्तरमपि, एतावत्पर्यन्तं बौद्धसाहित्यस्य धरातले स्वच्छन्दतया प्रवाहमानायाः बौद्धकाव्यमन्दाकिन्याः परमपवित्रस्यामृतवारिणो रसास्वादनस्य सौभाग्यं सहृदयसाहित्यसमीक्षकेभ्यः सुलभं न जातम्।

बौद्धपरम्पराः काव्यशास्त्रदृष्ट्या संस्कृतसाहित्याय बहु किमपि नवीनं प्रायच्छत्। शान्तरसस्य प्रादूर्भावः बौद्धपरम्परायाः संस्कृत-काव्यशास्त्रे विशिष्टम् अवदानं वर्तते। नाट्यशास्त्रे अष्टौ रसानाम् एव उल्लेखः वर्तते। यदा बौद्धधर्मसम्बद्धानि काव्यानि रचितानि अभूवन्, तदा काव्यशास्त्रपरम्परायां शान्तरसस्य विवेचनमारब्धम्। बौद्धपरम्परायाः प्रभावेण खलु प्रतीत्यसमुत्पादस्य सन्दर्भे रसावबोधः कर्तुं शक्यते। एवमेव न्यायपरम्परायामपि बौद्धदर्शनस्य विशिष्टं योगदानं वर्तते, यत् खलु अलङ्कारशास्त्रस्य विकासे सहकारिभूतं सञ्जातम्। महान्तौ आलङ्कारिकौ आचार्यौ भामह-दण्डिनौ बुद्धमतानुयायिनौ आस्तामिति विदुषां विचारो वर्तते। मम्मटादयः आचार्याः बौद्धदर्शनस्य सन्दर्भे स्वीयां चिन्तनसरणिं सारयन्तः शब्दशक्तीनां विवेचनं प्रास्तुवन्। अस्यां च परम्परायां सुबोधालङ्कारः स्वाभाषालङ्कारश्च च अलङ्कारग्रन्थौ लभ्येते। एवमेव छन्दोरत्नाकरस्य छन्दःशास्त्रीय-ग्रन्थस्यापि समुपलब्धिः जायते। अपि च, विविधेषु कालेषु अस्य बौद्धमिश्रितसंस्कृतसाहित्यस्य भोटचीनीभाषयोः अनुवादोऽपि सञ्जातः। तयोः भोटचीनीभाषयोः समुपलब्धस्य साहित्यस्य संस्कृतभावानुवादः विद्वद्भिः विहितः, येन अस्माकं हस्तच्युता सम्पत् पुनः हस्तागतमणिर्जाता। यथा खलु महाकविना अश्वघोषेण विरचितस्य बुद्धचरितस्य पूर्वार्द्धभागस्य कैश्चित् खण्डितश्लोकैः सहितः १४ सर्गात्मकः उत्तरार्द्धभागः अनेनैव विधिना महता प्रयत्नेन संस्कृतेन विरचितः। जान्स्टननामकेन वैदेशिकेन विदुषा भोटचीनीभाषयोः आंग्लानुवादं कृत्वा प्रकाशितः, यस्य हिन्द्यनुवादः आचार्येण सूर्यनारायणचौधरिणा विहितः। ततश्च विशिष्टाः संस्कृतविद्वांसः अस्य हिन्द्यनुवादस्य संस्कृतपद्यानुवादम् अकुर्वन्। एतादृशः सहस्र-संख्याकाः ग्रन्थाः भोटचीनीभाषयोः लभ्यन्ते। तेषां संस्कृतभाषायां पुनः छायानुवादः आवश्यको वर्तते।

संस्कृत-काव्यशास्त्रदृष्ट्या यदा वयं बौद्धकाव्यानां साहित्यस्य वा अनुशीलनं समीक्षणं च कुर्मः, तदा ज्ञायते यत् साहित्यजगतः अन्यकृतीनामिव एतासु अपि समेऽपि काव्यगुणाः समुपलभ्यन्ते इति। रस-छन्दः-अलङ्कार-गुणादिदृष्टिभिः इदं बौद्धसंस्कृतकाव्यं श्रेष्ठकाव्यं सिद्ध्यति। अनेनैव कारणेन विश्वसाहित्ये एतासां बौद्धकृतीनां महत्त्वपूर्णं स्थानं वर्तते। भगवद्बुद्धदेशनाः सम्पूर्णं विश्वसमाजम् अन्ताराष्ट्रियस्तरे एकस्मिन् सूत्रे बध्नन्ति। अतः इदं बौद्धसाहित्यं 'विश्वसाहित्यम्' इति आख्यामर्हति। इत्थं सहस्रशः ग्रन्थाः अनुवाद- अनुसन्धान-समालोचनानाम् अभावे उपेक्षिताः सन्ति। एतेषाम् अनुवाद-अनुसन्धनाभ्यां नूनं भारतीयस्य इतिहासस्य संस्कृतेश्च अनुद्घाटिताः पक्षाः समधिकं स्पष्टतराः भविष्यन्ति। अनेन च अस्मिन् विषये नैके नूतनाः साहित्यविषयकाः आयामाः समुद्घाटिताः भविष्यन्तीति। एतादृशमेव महान्तं कार्यं साधयितुं विचारान् उपस्थापयितुम् वर्द्धयितुं च इयम् अन्ताराष्ट्रिया सङ्गोष्ठी ३०-३१ जनवरी, २०१९ इत्येतस्मिन् अवधौ भारतशासनस्य मानवसंसाधन-विकासमन्त्रालयान्तर्गतस्य राष्ट्रियसंस्कृतसंस्थानस्य देवप्रयागस्थेन श्रीरघुनाथकीर्तिपरिसरस्य साहित्यविभागेन समायोजिता।

ध्यातव्यमस्ति यद् राष्ट्रियसंस्कृतसंस्थानं संस्कृतेन सह पालि-प्राकृतभाषयोः अध्ययनाय, अनुसन्धानाय संवर्धनाय च कृतसङ्कल्पं वर्तते। साम्प्रतं, संस्थानं पालि-प्राकृतभाषयोः साहित्यस्य संस्कृतच्छायया सह हिन्दी-आंग्लानुवादमपि कुर्वद् वर्तते। अस्मिन् क्रमे भावयामः यद् इयम् अन्ताराष्ट्रिया सङ्गोष्ठी नूनं नूतनां कामपि विशिष्टां सम्भावनाम् उदभावयद् इति। बौद्धसंस्कृतसाहित्यस्य अनुवाद-अनुसन्धान-विमर्शादिभिः नूनं भारतस्य गौरवं सर्वत्र प्रसरिष्यतीति विश्वसिमः।

## अभूत् आधुनिकविभागीया राष्ट्रिय-सङ्गोष्ठी



सरस्वतीसमर्चनं कुर्वन्तः अतिथयः विद्वांसश्च

श्रीरघुनाथकीर्तिपरिसरस्य आधुनिकविभागेन सङ्कल्पिता द्विदिवसीया राष्ट्रिया सङ्गोष्ठी ०३ फरवरी, २०१९ तः ०४ फरवरी, २०१९ दिनाङ्कं यावत् 'लोक संस्कृति का इतिहास से अन्तःसम्बन्ध' शीर्षकमधिकृत्य समायोजिता। अस्याः सङ्गोष्ठ्याः उद्घाटनं ०३.०४.२०१९ तमे दिनाङ्के हिन्दीसाहित्य-लोकसंस्कृत्योः वरिष्ठाचार्यस्य श्रीमतो विनोदतनेजामहोदयस्य करकमलाभ्यां, राष्ट्रियसंस्कृतसंस्थानस्य शैक्षणिकोपनिदेशकस्य डा. देवानन्दशुक्लस्य विशिष्टातिथ्ये तथा परिसर-प्राचार्यस्य प्रो. के.बी. सुब्बरायुडु-महोदयस्य आध्यक्ष्ये च सम्पन्नम्। कार्यक्रमस्य प्रारम्भः वैदिकमन्त्रघोषेण अभवत्। तत्पश्चात् मातुः सरस्वत्याः समर्चनानन्तरम् आधुनिकविभागस्य हिन्दीप्राध्यापकेन डा. वीरेन्द्रसिंहबर्त्वालेन अतिथीनां वाचिकं स्वागतं कृतम्। 'अतिथि देवो भव' इति परम्परां निर्वहता प्राचार्येण पुष्पगुच्छाभिः अतिथयः सम्मानिताः। ततः आधुनिकविभागीयेन इतिहास-प्राध्यापकेन, सङ्गोष्ठीसंयोजकेन डा. अरविन्दसिंहगौरेण च सङ्गोष्ठ्याः परिकल्पनां प्रस्तूय विषयप्रवर्तनं कृतम्। धन्यवादज्ञापनं सङ्गणकप्राध्यापकेन श्रीपङ्कजकोटियालेन तथा सत्रसञ्चालनं च डा. मुकेशकुमारेण कृतम्।

सङ्गोष्ठीयं सप्त सत्रेषु सञ्चालिता, यत्र ५ सत्रेषु शोधपत्रवाचनं जातम्। प्रथमसत्रस्य अध्यक्षता डा. देवानन्दशुक्लेन, द्वितीयसत्रस्य डा. कृपाशङ्करशर्मणा, तृतीयसत्रस्य डा. प्रफुल्लगडपालेन, चतुर्थ-पञ्चमसत्रयोः प्रो. नरेन्द्रप्रतापसिंहेन विहितम्। एतदवसरे इतिहास-हिन्दी-संस्कृत-भूगोल-राजनीतिविज्ञान-मनोविज्ञान-समाजशास्त्र-अर्थशास्त्र-अंग्रेजी-सङ्गणक-शारीरिक-शिक्षादिविविधविषयेषु ६० शोधपत्राणि प्रस्तुतानि।

सम्पूर्तिसत्रस्य मुख्यातिथिः डा. प्रेमचन्द्रशास्त्री (उत्तराखण्डसंस्कृतएकेडम्याः निदेशकः), विशिष्टातिथिः प्रो. सोहनलालभट्टः (प्राचार्यः, राजकीयमहाविद्यालयः, चकराता, देहरादूनम्), सारस्वतातिथिः श्रीपवनकुमारः (प्रान्तप्रमुखः, राष्ट्रियस्वयंसेवकसंघः) तथा समस्तकार्यक्रमस्य सूत्रधारः अध्यक्षः परिसरप्राचार्यः प्रो. के.बी. सुब्बरायुडुः च आसन्। एतेषां महोदयानामुपस्थितौ च सङ्गोष्ठी स्वकीयं पूर्णम् आयामं प्राप्तवती। अस्यां द्विदिवसीय-राष्ट्रियसङ्गोष्ठ्यां विविधप्रान्तेभ्यः तथा जर्मनी-चीनदेशयोश्च अनुसन्धातारः प्रतिभागं कृतवन्तः।

## ।।प्रास्ताविकम्।।

संस्कृतेः सामान्यः अर्थः भवति-'शिष्टः आचार-व्यवहारः शिष्टा च जीवनशैली' या सर्वजनग्राह्या भवति। संस्कृतिः आध्यात्मिक-मानसिक-वैशिष्ट्यानां द्योतिका अस्ति। 'संस्कृति'-शब्दः कृ-धातोः सम्-उपसर्गपूर्वकं क्तिन्-प्रत्यययोगेन निष्पद्यते। एवं संस्कृतेः शाब्दिकः अर्थः भवति सम्यग्रूपेण कृतः आचार-व्यवहारः। एतदाधारेण वक्तुं शक्यते यद् यस्य व्यक्तेः जीवनं परिष्कृतम् सः सुसंस्कृतम् । एवं संस्कृतिर्नाम काचिद् जीवनपद्धतिः इति वक्तुं शक्यते, या च परिष्कृता भवति। अतः सम्पूर्णे समाजे स्वीकार्या वर्तते।

प्रत्येकं क्षेत्रस्य समुदायस्य च स्वकीया विशिष्टा संस्कृतिः वर्तते। एतदाधारेण भारतीयसंस्कृतेः वार्तां कुर्मश्चेत् सा विश्वे महत्वपूर्णं स्थानं धारयति। एषा वैदिकी संस्कृतिः इत्यपि कथ्यते। एषा च भारतस्य आत्मा अस्ति तथा आध्यात्म-सहिष्णुता-दया-क्षमा चेत्यादयः अस्य गुणाः भवन्ति। एतस्मात् कारगात् सम्पूर्णसंसारे भारतस्य जयघोषो भवति। यावान् लोकसंस्कृतेः प्रश्नः, अस्याः क्षेत्रं संस्कृतेः लघुतरं भवति। एकस्यां संस्कृतौ अनेकाः लोक-संस्कृतयः समाहिताः सन्ति। एकस्यां संस्कृतौ अन्तर्भूतासु लोकसंस्कृतिषु परस्परं सम्बन्धो वर्तते। इतिहासः साहित्यं च संस्कृतेः दर्पणो भवति। इतिहासः जातेः, वर्गस्य, क्षेत्रस्य जीवनपद्धतेः, आचार-व्यवहारयोः अतीतं प्रतिबिम्बयति तथा साहित्यं तात्कालिकसमाजस्य दशां मनोभावञ्च रोचकविधिना प्रस्तौति। यथा लोकसंस्कृतिः संस्कृतेः अंशो भवति, तथैव लोकसाहित्यं साहित्यस्य लघुरूपं भवति। प्रकारान्तरेण साहित्यं कालान्तरे इतिहासस्य रूपं ग्रहीतुं शक्नोति। कथयितुं शक्यते यत् इतिहासः तथा साहित्यञ्च एवं कश्चन सशक्तः प्रभावी च माध्यमोऽस्ति येन वयं कस्याश्चित् संस्कृतेः साङ्गोपाङ्गम् अध्ययनं कर्तुं शक्नुमः, एतद्विषये सम्पूर्णं ज्ञानम् अर्जयितुं शक्नुमः। अस्माभिः स्व-सामाजिक-धार्मिक-राजनैतिक-आर्थिक-सांस्कृतिक-स्वरूपं बोधव्यं चेत् पौराणिक-आख्यानानां लोककथानां, लोककलानां तथा लोकव्यवहारस्य अनुसन्धानं युक्तियुक्तैः पुष्टप्रमाणैश्च कर्तव्यम्। एवंकरणेन अनुसन्धानस्य नव-दिशां सूत्रपातं भवति तथा एतेन च शोधार्थिनां मार्गः प्रशस्तः भवति। आधुनिकविभागीय-शोधसङ्गोष्ठ्याः आधारभित्तिः अस्यां परिकल्पनायामाधृताऽस्ति।




मुख्यातिथित्वेन भाषमाणः डा. विनोदतनेजा

संस्कृतेः संरक्षणे प्रचारप्रसारयोश्च इतिहास-साहित्ययोः महती भूमिका दृष्टिगता भवति। अतः परिसरस्य आधुनिकविभागेन अस्याः राष्ट्रीय-सङ्गोष्ठ्याः विषयः लोकसंस्कृतौ तथा लोकसाहित्य-इतिहासयोः उपरि च केन्द्रीकृतः।

## वेदविभागेन आयोजिता राष्ट्रिया सङ्गोष्ठी

वेदविभागीया द्विदिवसीया राष्ट्रिया सङ्गोष्ठी १८.०२.२०१९ तः १९.०१.२०१९ दिनाङ्कं यावत् समनुष्ठिता। सङ्गोष्ठ्याः प्रतिपाद्यो विषयः आसीत् – 'वेदेषु देवतावादः'। अतिथिभिः दीपप्रज्वालनपुरस्सरं मातुः शारदायाः माल्यार्पणसमर्चनात्परं वैदिकलौलिक-मङ्गलाचरणाभ्याम् उद्घाटनसत्रं समारभत। वेदविभागप्राध्यापकेन डा. शैलेन्द्रप्रसादउनियालेन अतिथिस्वागतं विषयप्रवर्तनञ्च विहितम्। सत्रेऽस्मिन् मुख्यातिथित्वेन श्री. ला.ब.शा.रा.सं. विद्यापीठस्य पौरोहित्यविभागाचार्यः प्रो. रामराज-उपाध्यायः 'श्रौतयागेषु चातुर्मास्ययागः' इत्यमुं विषयमधिकृत्य विशिष्टं व्याख्यानम् अकरोत्। श्रीलालबहादुरशास्त्रिराष्ट्रियसंस्कृतविद्यापीठस्य वेदविभागस्य सहाचार्यः डा. रामानुज-उपाध्यायः सारस्वतातिथिभाषणेन तथा च श्रीरङ्गलक्ष्मी-आदर्शसंस्कृतमहाविद्यालयस्य साहित्य-विभागस्य आचार्यः डा. धर्मानन्द-राउतमहाभागा विशिष्टातिथिभाषणेन विशिष्टोद्बोधनं कृतवन्तः। उद्घाटनसत्रस्य सञ्चालनं डा. नितेशकुमारद्विवेदिना सम्पादितम्। उद्घाटनसत्रस्य विशिष्टव्याख्यानानन्तरं विविधसत्रेषु डा. सुन्दरनारायणझा (विद्यावाचस्पतिः)-डा. रामानुजोपाध्याय-प्रो. के.बी. सुब्बरायुडु-डा. रामप्रसादोपाध्यायाः सत्राध्यक्षाः आसन्। एवमेव षष्ठं सत्रं सम्पूर्त्ति-सत्रं समजायत। वस्तुतः यथा षडङ्गो वेदस्तथैवात्रापि षट् सत्राणि जातानि, यानि सम्पूर्णतासूचकानि मन्यन्ते।



विशिष्टातिथिः डा. धर्मानन्दराउतः अभिनन्द्यते

### ।। प्रास्ताविकम्।।

विदन्त्येव विद्वांसो यद्वेदा अस्माकं भारतीयानां परमप्रमाणभूताः ज्ञानशेवधित्वेन राराजन्ते। तेषु वेदवेदाङ्गशास्त्रेषु देवतायाः स्वरूपं कीदृगिति निर्णयः अस्यां विद्वत्सङ्गोष्ठ्यां विविधविचारचातुर्यविनिर्जितसकलवादिवृन्दोपरि विराजमानैः भासमानैः सम्मान्यैः विद्वद्भिः 'वेदेषु देवतावादः' इति शीर्षकाधारेण गृहीतः। वेदेषु देवतावादः इत्येव कथमिति जिज्ञासायाः शमनप्रसङ्गे एवं चिन्तयितुं शक्यते यज्जना: मन्त्रस्य देवतामविज्ञाय मन्त्राञ्जपन्ति चेत्तत्र विगुणतया फलहानिः श्रमवैयर्थ्यापत्तिर्जायते, परन्तु एवं मा भूयात्। जनाः स्वलक्ष्ये सफला भवेयुः। एवमेव समाजेऽधुना भ्रान्तिर्विद्यते यत् कति देवताः सन्ति। अस्योत्तरं च वेदाः प्रामुख्येन निर्णयं दास्यन्तीति मत्वा विषयोऽयं केन्द्रीकृतः। यतोहि-

**अविज्ञाय ऋषिं छन्दोदैवतं योगमेव च।**
**योऽध्यापयेज्जपेद्वापि पापीयाञ्जायते तु सः।।**

तथा चाह वृहद्देवताकारः शौनकः-

**वेदितव्यं दैवतं हि मन्त्रे मन्त्रे प्रयत्नतः।**
**दैवतज्ञो हि मन्त्राणां तदर्थमवगच्छति।।** (बृहद्देवता - २)
**नहि कश्चिदविज्ञाय याथातथ्येन दैवतम्।**
**लौक्यानां वैदिकानां वा कर्मणां फलमश्नुते।।** (बृहद्देवता - ४)



अध्यक्षीयम् उद्बोधयन् परिसरप्राचार्यः प्रो. के.बी. सुब्बरायुडुः

तत्रैव २१ तमे श्लोके शौनको मनुते यत् तदेव कर्म सर्वथा साफल्यं याति, देवतायाः परिज्ञानं भवति, यतोहि ज्ञाता परिज्ञानानन्तरमेव मन्त्रान् कर्मसु योजयति। विशदेन चात्र व्याख्यास्यन्ति वेदज्ञाः विद्वांसः। 'वादे वादे जायते तत्त्वबोधः' इति वैयाकरणाः समामनन्त्येव। येन समञ्जसा देवतावादस्य परिज्ञानेन समाजस्य वेदानुरागिणामनुसन्धित्सूनाञ्च महाँल्लाभो भविष्यतीति धिया प्रकल्पितोऽयं विषयः। संस्थानस्य परिसरस्य वेदविभागेन १८-१९.०२.२०१९ दिनाङ्कयोः राष्ट्रिया वैदिकसङ्गोष्ठी समायोजिता। तथा चात्रैव 'वेदस्य परमं प्रतिपाद्यम्' इति विषयमवलम्ब्य विशिष्टव्याख्यानं महात्मगान्धीकाशीविद्यापीठस्य वाराणस्याः पूर्वसंस्कृतविभागाध्यक्षः प्रो. राममूर्तिचतुर्वेदी प्रदत्तवान् इति महतो हर्षस्य विषयः।

### पद्यवती प्रस्तावना

कतीह देवताः सन्ति पूज्यास्तु शुभदास्तथा।
निर्णयो वेदवेदाङ्गशास्त्रेषु ऋषिभिः कृतः।।१।।

देवो दानाद्दीपनाद्वा द्योतनाच्च प्रकीर्तितः।
कियती विद्यते संख्या स्फुटं येन भविष्यति।।२।।

विद्वद्भिर्बहुशोधैश्च निर्णयो वै प्रदास्यते।
देवतामवगच्छन्तु सङ्गोष्ठ्यां नात्र संशयः।।३।।

देवतावादमेवात्र निर्णीयते
नीयते लोकदृष्टिर्हि सच्चिन्तने।
येन चाज्ञानतिमिरस्य वै संक्षयो
सञ्चयो ज्ञानगीतेरभीतैस्सदा।।४।।

देवतादानयुक्ताः भवेयुर्हि नः,
वेदविद्यासुहृद्या शुभा।
भारते भारतीया जगद्गौरवं,
प्राप्नुयुर्मानवा मानवान्वैभवान्।।५।।

## आयोजिता न्यायविभागीया राष्ट्रिया सङ्गोष्ठी

न्यायविभागीया द्विदिवसीया राष्ट्रिया सङ्गोष्ठी २०.०२.२०१९ तः २१.०२.२०१९ दिनाङ्कं यावद् आयोजिता। सङ्गोष्ठ्याः मुख्यो विषयः आसीत्–'वैशेषिक-सूत्रोपस्कारस्थ-विशेषविचाराणां परिशीलनम्'।



उद्घाटनभाषणं प्रस्तुवन् मुख्यातिथिः प्रो. महाबलेश्वरभट्टः

पदार्थानां तत्त्वयथार्थधिया परमपुरुषार्थस्य मोक्षस्याधिगमः भवतीति वैशेषिक-न्यायतन्त्राभ्याम् उररीक्रियते। पदार्थसंख्यास्वरूपादिविषये सत्यामपि विप्रतिपत्तौ इमे द्वे शास्त्रे समानतन्त्रत्वेन बहुशः साम्योपलम्भात् शास्त्रजगति सुप्रथिते। द्रव्यादिप्रभेदेन आधिक्यं भजमानानां पदार्थानां लक्षणप्रमाणादिसर्वस्वप्रतिपादककोशेषु प्रशस्तपादभाष्याद्याकरग्रन्थेषु एवं न्यायसिद्धान्त-मुक्तावली-इत्यादिप्रकरणग्रन्थेषु मध्ये वैशेषिकाचार्याणां श्रीकणादमहर्षीणां समग्रसूत्राणां विवरणपरः श्रीशङ्करमिश्रवर्याणां वैशेषिकसूत्रोपस्कारः निरतिशयं स्थानं बिभ्रति। तत्रेदं निदानं यदयं ग्रन्थः पूर्वाचार्याणां कर्कशसरणिमादृत्य नैकसन्दर्भेषु विलक्षणविचाराणां संयोजनपुरस्सरं पदार्थानां लक्षणपरीक्षे सरलया भाषया वर्णयतीति।

नव्यन्यायशैल्या प्रवर्तमानं परिष्कारभूयिष्ठञ्चोपस्कारग्रन्थमलम्ब्य विचारसङ्गोष्ठीं समायोजयितुं समकल्पयत् राष्ट्रियसंस्कृत-संस्थानस्य श्रीरघुनाथकीर्तिपरिसरीयः न्यायविभागः। तदनुगुणम् फरवरीमासस्य २०.०२.२०१९ तः २१.०२.२०१९ दिनाङ्कपर्यन्तं 'वैशेषिकसूत्रोपस्कारस्थविशेषविचाराणां परिशीलनम्' इति शीर्षके दिनद्वयव्यापिनी राष्ट्रियसङ्गोष्ठी समायोजिता। विचारसङ्गोष्ठ्याम् अधोनिर्दिष्टविचारबिन्दुषु यथायोग्यं विचाराः उपस्थापिताः अभूवन्–

१. द्रव्यादिपदार्थानां लक्षणप्रतिपादने विशेषः।
२. पदार्थानां साधर्म्य-वैधर्म्यप्रतिपादने वैलक्षण्यम्।
३. उपस्कारे उपलभ्यमानदर्शनान्तरविचाराः।
४. वेदपौरुषेयत्वव्यवस्थापने युक्तिः।
५. स्फोटवादनिराकरणम्
६. वेदान्तसम्मतात्ममोक्षादिखण्डनपरामर्शः।
७. वैशेषिकाणां पाकप्रक्रिया।
८. बौद्धाभिमतापोहवादखण्डनम्।
९. असत्कार्यवादस्थापनम्।
१०. शब्दः द्रव्यमिति मीमांसकसिद्धान्तदूषणविमर्शः।
११. ज्ञानस्य सप्रभेदं विमर्शः चेति।



सम्पूर्तिसत्रे विशिष्टातिथिभाषणं कुर्वन् प्रो. बनमालीबिश्वालः

उद्घाटनसत्रे एवञ्च सम्पूर्तिसत्रे प्रो. महाबलेश्वर पि. भट्टः मुख्यातिथिः, परिसरप्राचार्यः च सभाध्यक्षः आस्ताम्। सम्पूर्तिसत्रे प्रो. बनमाली बिश्वालमहोदयेन विशिष्टातिथित्वं निर्व्यूढम्। सङ्गोष्ठ्याः द्वितीये तृतीये च सत्रयोः डा. आर. बालमुरुगन् महोदयः डा. राघवेन्द्रः पी आरोल्लीमहोदयश्च क्रमशः सत्राध्यक्षतां विहितवन्तौ।


डा. राघवेन्द्र पी. आरोल्ली अभिनन्द्यते


प्रमाणपत्रवितरणस्य किञ्चन दृश्यम्


प्रमाणपत्रं प्रयच्छन्तः मञ्चस्थाः विद्वांसः

## वेदान्तविभागीया राष्ट्रिया सङ्गोष्ठी सम्पन्ना



उद्घाटनकार्यक्रमस्य किञ्चन दृश्यम्

वेदान्तविभागीया द्विदिवसीया राष्ट्रिया सङ्गोष्ठी २२.०२.२०१९ तः २३.०२.२०१९ दिनाङ्कं यावद् आयोजिता। सङ्गोष्ठ्याः केन्द्रीयो विषयः आसीत्–'मोक्षसाधन-सामग्रीविमर्शः'। २८.०१.२०१९ तमे दिनाङ्के पूर्वाह्णे परिसरे अस्याः राष्ट्रिय-सङ्गोष्ठ्याः उद्घाटनसत्रं सम्पन्नम्। दीप-प्रज्वालनेन वाग्देवीमाल्यार्पणेन कार्यक्रमः प्रारब्धः। राङ्कवादि-प्रदानपुरःसरम् अतिथिसम्माननं परिसर-प्राचार्य-महोदयैः विहितम्। स्वागतभाषणं प्रास्ताविकञ्च व्याकरणविभागाध्यक्षेण प्रो. बनमालीबिश्वालेन प्रस्तुतम्। अत्र विशिष्टातिथिभाषणं डा. शम्भूनाथ-महालिकेन विहितम्। विशिष्टव्याख्यानञ्च शृङ्गेरीपरिसरस्य पूर्ववेदान्तविभागाध्यक्षेण प्रो. महाबलेश्वरभट्टेन विहितम्।

अस्मिन्नवसरे साहित्यविभागस्य 'साहिती'-पत्रिकायाः द्वितीयाङ्कस्य लोकार्पणमतिथिभिः तथा सम्पादकेन च विहितम्। अस्मिन् उद्घाटनसत्रे अध्यक्षीयमुद्‌बोधनं परिसरप्राचार्येण वेदान्तविभागाध्यक्षेण प्रो. के.बी. सुब्बरायुडु-महोदयेन कृतम्। अन्ते च, धन्यवादज्ञापनं साहित्यविभागीय-प्राध्यापकेन डा. प्रफुल्ल-गडपालेन विहितम्। अस्य उद्घाटन-सत्रस्य सञ्चालनं डा. नीतेशद्विवेदिना कृतम्।

अस्याः सङ्गोष्ठ्याः विविध-पत्रवाचनसत्रेषु डा. भगवान् सामन्तरायेन, प्रो. के.बी. सुब्बरायुडुमहोदयेन, प्रो. बनमाली-बिश्वालेन तथा प्रो. महाबलेश्वरभट्टमहोदयेन सत्राध्यक्ष्यदायित्वं निर्व्यूढम्। एषु सत्रेषु प्रो. बनमालीबिश्वालः, डा. नीतेशद्विवेदी, श्रीश्रीओमशर्मा, डा. शैलेन्द्र-प्रसाद-उनियालः, डा. आर. बालमुरुगः, सुश्रीः के. मनोज्ञा, डा. वीरेन्द्रसिंहबर्त्वालः, डा. मूलचन्द्रशुक्ल-प्रभृतिभिः शोधपत्राणि प्रस्तुतानि।

२९.०१.२०१९ तमे दिनाङ्के अपराह्णे ३.०० वादने वेदान्त-विभागीय-द्विदिवसीय-राष्ट्रिय-सङ्गोष्ठ्याः सम्पूर्तिसत्रम् आयोजितम्। परिसरस्य प्राचार्य-महोदयानाम् आध्यक्ष्ये सम्पन्नेऽस्मिन् कार्यक्रमे डा. आर. बालमुरुगमहोदयः विशिष्टातिथिरूपेण उद्‌बोधनं कृतवान्। स्वागतभाषणं डा. श्रीश्रीओमशर्मणा तथा सञ्चालनं नीतेशद्विवेदिना कृतम्। अन्ते च, डा. प्रफुल्लगडपालेन धन्यवादज्ञापनं कृतम्।

## प्रास्ताविकम्

सर्वेषां भारतीयशास्त्राणां लक्ष्यं भवति पुरुषार्थ-चतुष्टयसम्प्राप्तिः। धर्मार्थकाममोक्षेषु चतुर्षु पुरुषार्थेषु मोक्षस्य प्राधान्यं सर्वत्र सर्वैश्च स्वीकृतम्। एवं न केवलं भारतीयदर्शनानां किन्तु समेषां भारतीय-शास्त्राणां मुख्यं लक्ष्यं मोक्षप्राप्तिरेव भवति। किन्तु सर्वेषां तत्तच्छास्त्राणां तथा तदङ्गतया न्याय-वैशेषिक-सांख्य-योग-मीमांसा-वेदान्तादि-समेषां दर्शनानां मोक्षसाधनमार्गास्तु भिन्नाः भिन्नाः भवन्ति।


प्रो. बनमालीबिश्वालः अभिनन्द्यते

वस्तुतः तत्त्वज्ञानात् मोक्षप्राप्तिर्भवतीति प्रायो दर्शनेषु स्वीक्रियते। सांख्यदर्शने उक्तमस्ति–

**पञ्चविंशतितत्त्वज्ञः यत्र कुत्राश्रमे वसेत्।**
**जटी मुण्डी शिखी वापि मुच्यते नात्र संशयः।।**

एवमेव न्यायदर्शने महर्षेः गौतमस्य न्यायसूत्रे–

'प्रमाण-प्रमेय-संशय-प्रयोजन-दृष्टान्त-सिद्धान्तावयव-तर्क-निर्णय-वाद-जल्प-वितण्डा-हेत्वाभास-च्छल-जाति-कपट-निग्रहस्थानानां तत्त्वज्ञानान्निःश्रेयसाधिगमः।।' इति प्रतिपादितमस्ति।


वैशेषिकदर्शने वैशेषिकसूत्रेऽपि–

धर्मविशेषप्रसूताद् द्रव्यगुणकर्म-सामान्य-विशेष-समवायानां पदार्थानां साधर्म्य-वैधर्म्याभ्यां तत्त्वज्ञानान्निःश्रेयसम् इति प्रमाणितमस्ति।

एवं विविध-शास्त्रेषु यद्यपि जन्माभावरूपम् आत्यन्तिकसुखसाधकम्, जीवस्य ब्रह्मभावः, पराहतनाड्यामनाहतशब्दश्रवणं मोक्ष इत्येतादृशं मोक्षस्य बहुविधं लक्षणम् उपलभ्यते तथापि परब्रह्मणि परमात्मनि विलयमेव मोक्षस्वरूपमिति निर्विवादतया स्वीक्रियते। न केवलं दर्शनेषु, किन्तु साहित्यव्याकरणादिशास्त्रेष्वपि मोक्षसाधनानि विमृष्टानि।

'रसो वै सः', 'रसब्रह्मसहोदरः', 'रसमेव लब्ध्वा आनन्दीभवति' इत्याद्युक्तिभिः साहित्यशास्त्रस्य, 'द्वे ब्रह्मणी वेदितव्ये शब्दब्रह्म च यत्, शब्दब्रह्मणि निष्णातः परब्रह्माधिगच्छति', 'इयं सा मोक्ष्यमाणानामजिह्मा राजपद्धतिः' इत्याद्युक्तिभिः व्याकरणशास्त्रस्य च मोक्षसाधकत्वं प्रतिपादितं वर्तते। एतस्यां पृष्ठभूमौ वेदान्तविभागीय-सङ्गोष्ठ्याः विषयः मोक्षसाधनसामग्रीविमर्शः इति स्थिरीकृतः यस्य आधुनिकयुगे प्रासङ्गिकता वरीवर्ति।

## प्रवर्तिता व्याकरणविभागीया व्याख्यानमाला



अभिनन्द्यते मुख्यवक्ता डा. ब्रजभूषणओझा

व्याकरण-विभागीय-विशिष्टव्याख्यानं २८.०१.२०१९ तमे दिनाङ्के आयोजित-मभवत्। विशिष्टव्याख्यानस्य विषयः आसीत् – 'समासवृत्तिविमर्शः'।

अत्र विशिष्टव्याख्याता च आसीत्–बनारसहिन्दूविश्वविद्यालयस्य धर्मविज्ञान-सङ्काये व्याकरणविभागीयः आचार्यः डा. ब्रजभूषणओझामहोदयः। तेन स्वव्याख्यानक्रमे कृततद्धितादिषु पञ्च वृत्तिषु समासवृत्तेः स्वरूपं सप्रमाणं विवेचितम्। अस्मिन् विशिष्ट-व्याख्यानमालाकार्यक्रमे परिसरीयव्याकरणविभागाध्यक्षेण प्रो. बनमालीबिश्वालमहोदयेन विषयप्रवर्तनं विहितं तथा स्वागतभाषणं च कृतम्।

डा. नीतेशद्विवेदिना सञ्चालनं तथा श्रीश्रीओमशर्मणा धन्यवादाः ज्ञापिताः। अस्मिन् अवसरे परिसरीयाः बाह्याश्च नैके विद्वांसः शोधच्छात्राश्च व्याख्यानस्य लाभं गृहीतवन्तः।

## सम्पन्ना साहित्यविभागीया व्याख्यानमाला



मुख्यवक्तृत्वेन भाषमाणः प्रो. बिजयपालशास्त्री

साहित्यविभागीय-विशिष्टव्याख्यानं ३०.०१.२०१९ तमे दिनाङ्के समायोजिता। अस्य विशिष्टव्याख्यानस्य विषयः आसीत् – 'बौद्धसंस्कृतसाहित्ये अनुवादे अर्थनिर्धारणस्य समस्याः सम्भावनाश्च।'

अस्यां साहित्यविभागीयायां व्याख्यानमालायां विशिष्टवक्ता आसीत्–हिमाचलप्रदेशस्य बलाहरस्थस्य वेदव्यासपरिसरस्य साहित्यविभागाध्यक्षः प्रो. विजयपाल-शास्त्रीमहोदयः। अनेन महोदयेन बौद्धसाहित्यस्य शब्दावलीविषये महती चर्चा कृता। तस्य कथनमासीद् यद् अस्माभिः संस्कृतज्ञैः नवीनशब्दानां सर्जनावसरे प्राचीनबौद्धसंस्कृत-साहित्यस्य अवश्यमेव अध्ययनं कर्तव्यम्। यतोहि अस्मिन् साहित्ये दैनिकजीवनोपयोगिनः नैके शब्दाः लभ्यन्ते, किन्तु वयं तेषाम् उपयोगं न कुर्मः, न च तद्विषये जानीमः। तथैव बौद्धधर्मस्य दर्शनस्य विषयेऽपि सः स्वीयमाशयं प्रस्तुतवान्। धम्मपदस्य सौन्दरनन्दस्य च ससन्दर्भं चर्चां कुर्वन् सः बौद्धसाहित्यस्य बौद्धसाहित्यकाराणां योगदानविषये विषयं प्रस्तुतवान्। विशिष्य काव्यप्रकाशादि-संस्कृतलक्षणग्रन्थेषु बौद्धकवीनाम् उदाहरणानि स्वीकृतानि सन्ति इति स न्यरूपयत्। एवमेव भामहदण्ड्यादयः आचार्याः बौद्धमतानुयायिनः आसन् इत्यपि सः सप्रमाणम् उपस्थापितवान्।

अवसरेऽस्मिन् डा. प्रफुल्लगडपालेन पालिभाषायां सम्पादितायाः 'पालि-संवादो' इत्याख्यायाः ई-पत्रिकायाः लोकार्पणमपि अभवत्।

अस्यां व्याख्यानमालायां स्वागतभाषणं डा. कृपाशङ्करशर्मणा कृतम्। डा. प्रफुल्लगडपालमहोदयेन विषयप्रवर्तनं विहितम्। डा. दिनेशचन्द्रपाण्डेयेन सञ्चालनं कृतम् तथा प्रो. बनमालीबिश्वालमहोदयेन धन्यवादाः ज्ञापिताः।

## अनुष्ठिता ज्योतिषविभागीया व्याख्यानमाला



मुख्यवक्तृत्वेन भाषमाणः प्रो. देवीप्रसादत्रिपाठी

ज्योतिष विभागीय-विशिष्टव्याख्यानं २८.०१.२०१९ तमे दिनाङ्के सम्पन्नम्। विशिष्टव्याख्यानस्य विषयः आसीत् – 'वास्तुशास्त्रस्य लोकोपयोगित्वम्।' विशिष्टव्याख्याता च आसीत्– नवदेहलीस्थस्य श्रीलालबहादुरशास्त्रिराष्ट्रियसंस्कृत-विद्यापीठस्य वास्तुशास्त्रविभागाध्यक्षः प्रो. देवीप्रसादत्रिपाठी।

अस्मिन् विशिष्टव्याख्यानमालाकार्यक्रमे परिसरीयज्योतिषविभागप्राधापकेन डा. सुरेशशर्मणा विषयप्रवर्तनं विहितम्। डा. नीतेशद्विवेदिना सञ्चालनं तथा डा. मुकेशकुमार-शर्मणा धन्यवादाः ज्ञापिताः।

अस्मिन् अवसरे परिसरीयाः बाह्याश्च नैके विद्वांसः शोधच्छात्राश्च व्याख्यानेन उपकृताः अभवन्।

## प्रवर्तिता आधुनिकविभागीया व्याख्यानमाला



मुख्यवक्तृत्वेन भाषमाणः डा. देवानन्दशुक्लः

०३ .०२. २०१९ तमे दिनाङ्के आधुनिकविभागीया विशिष्टा व्याख्यानमाला आयोजिता, यत्र, डा. देवानन्दशुक्लः (उपनिदेशकः, शैक्षणिकः रा.सं.सं., नई दिल्ली) 'संस्कृत और संस्कृत अध्येताओं के भविष्य में कम्प्यूटर का योगदान' इति विषयमधिकृत्य विशिष्टव्याख्यानं प्रस्तुतवान्। तत्र च श्रीमती प्रीतिशुक्लया डा. देवानन्दस्य वक्तव्यस्य आंग्ल-भाषान्तरं प्रस्तूय सहयोगः प्रदत्तः।

अस्मिन् विशिष्ट-व्याख्यानमालाकार्यक्रमे परिसरीयहिन्दीप्राध्यापकेन डा. वीरेन्द्रसिंहबर्त्वालेन स्वागतभाषणं विहितं तथा इतिहासप्राध्यापकेन डा. अरविन्दसिंहगौरेण विषयप्रवर्तनं कृतम्।

## प्रवर्तिता वेदविभागीया व्याख्यानमाला

वेदविभागीय-विशिष्टव्याख्यानं १८.०२.२०१९ तमे दिनाङ्के समनुष्ठितम्। विशिष्टव्याख्यानस्य विषयः आसीत् – वेदस्य परमं प्रतिपाद्यम्। विशिष्टव्याख्याता च आसीत्–नवदेहलीस्थस्य श्रीलालबहादुरशास्त्रिराष्ट्रियसंस्कृतविद्यापीठस्य वास्तुशास्त्र-विभागाध्यक्षः प्रो. रामराजउपाध्यायः।

तेन स्वव्याख्यानक्रमे श्रौतयागेषु चातुर्मास्ययागः इत्यस्मिन् विषये सप्रमाणं चर्चितम्। अस्मिन् विशिष्टव्याख्यानमालाकार्यक्रमे प्रो. बनमालीबिश्वालेन स्वागतभाषणं कृतम् तथा परिसरीयवेदप्राध्यापकेन डा. शैलेन्द्रप्रसादउनियालेन विषयप्रवर्तनं विहितम्। डा. मुकेशकुमारेण सञ्चालनं तथा श्रीश्रीओमशर्मणा धन्यवादाः ज्ञापिताः।



वेदविभागीयव्याख्यानमालायाः किञ्चन दृश्यम्

## प्रवर्तिता वेदान्तविभागीया व्याख्यानमाला

वेदान्त-विभागीय-विशिष्टव्याख्यानं २२.०२.२०१९ तमे दिनाङ्के सम्पन्ना। विशिष्टव्याख्यानस्य विषयः आसीत् – ज्ञानकर्मसमुच्चयविचाराः।

विशिष्टव्याख्याता च आसीत्–राष्ट्रिय-संस्कृत-संस्थानस्य शृङ्गेरीपरिसरस्य वेदान्तविभागीयः आचार्यः प्रो. महाबलेश्वरभट्टमहोदयः। तेन स्वव्याख्यानक्रमे ज्ञानकर्म-समुच्चयविचारविषये स्वमतं सप्रमाणं विवेचितम्।

अस्मिन् विशिष्टव्याख्यानमालाकार्यक्रमे परिसरीयव्याकरणविभागाध्यक्षेण प्रो. बनमालीबिश्वालमहोदयेन विषयप्रवर्तनं विहितम् एवमेव स्वागतभाषणं डा. प्रफुल्ल-गडपालेन विहितम्। अस्मिन् सत्रे मञ्चसञ्चालनं डा. नीतेशद्विवेदिना कृतं तथा श्रीपङ्कजकोटियालेन धन्यवादाः ज्ञापिताः।



मुख्यवक्ता प्रो. महाबलेश्वरभट्टः अभिनन्द्यते

## 'पालि-संवादो' पत्रिकायाः लोकार्पणम्



'पालिसंवादो' पत्रिकायाः लोकार्पण-दृश्यम्

३०.०१.२०१९ तमे दिनाङ्के साहित्यविभागीयं विशिष्टव्याख्यानं समायोजितमभवत्। अस्मिन् अवसरे डा. के.बी. सुब्बरायुडु-प्रो. विजयपालशास्त्रि-डा. निरञ्जनमिश्र-डा. कृपाशङ्करशर्म-डा. प्रफुल्लगडपालैः 'पालि-संवादो' इत्यस्याः ई-पत्रिकायाः लोकार्पणं विहितम्।

ख्यापनीयं वर्तते यद् इयं 'पालि-संवादो' पत्रिका विश्वस्य प्रप्रथमा पालिपत्रिका वर्तते। अस्यां पत्रिकायां पालिभाषायां लेखाः, कविताः, विचाराः, पालिशिक्षणं च प्रकाश्यन्ते। पालिभाषया सह अत्र समानान्तरो हिन्द्यनुवादोऽपि प्रदीयते।

## सम्पन्नं विशिष्टं व्याख्यानम्




विषयप्रवर्तनं कुर्वन् डा. प्रफुल्लगडपालः

१५.०२.२०१९ तमे दिनाङ्के परिसरे प्रो. राधामाधवभारद्वाजमहोदयस्य विशिष्टं व्याख्यानम् आयोजितम्। तेन 'संस्कृत में इतिहास, इतिहास में संस्कृत' इति विषयमधिकृत्य महत्त्वपूर्णं सारगर्भितं च व्याख्यानं प्रस्तुतम्। अस्य सत्रस्य अध्यक्षता प्रो. बनमालीबिश्वालेन विहिता। अस्मिन् सत्रे स्वागतभाषणं, परिचयः विषयप्रवर्तनं च डा. प्रफुल्लगडपालेन विहितम्।

प्रो. राधामाधवभारद्वाजः महाकवेः कालिदाससाहित्यस्य सन्दर्भान् स्वीकृत्य संस्कृतसाहित्ये इतिहासस्य अवधारणां प्रस्तुतवान्। एवमेव इतिहासे संस्कृतसाहित्यस्य स्थानविषये सम्यक्तया व्याख्यामकरोत्। अवसरेऽस्मिन् प्रो. बनमालीबिश्वाल-महोदयोऽध्यक्षीयं भाषणं प्रस्तुतवान्। डा. आर. बालमुरुगेनापि स्वविचाराः प्रकटीकृताः।

## साहिती-पत्रिकायाः सङ्गोष्ठीविशेषाङ्कः लोकार्पितः



साहितीपत्रिकायाः लोकार्पणस्य किञ्चन दृश्यम्

२८.०१.२०१९ तमे दिनाङ्के वेदान्तविभागीय-द्विदिवसीय-राष्ट्रिय-सङ्गोष्ठ्याः उद्घाटनसत्रावसरे साहित्यविभागीयायाः 'साहिती'ति पत्रिकायाः अतिथिभिः लोकार्पणं विहितम्। इयं पत्रिका सङ्गोष्ठी-विशेषाङ्कत्वेन प्रकाशिता वर्तते। गतवर्षे साहित्यविभागेन परिसरे बौद्धसंस्कृतसाहित्ये अन्ताराष्ट्रिया सङ्गोष्ठी समायोजिता आसीत्। तस्यां सङ्गोष्ठ्यां प्रस्तुतानां शोधपत्राणां सङ्कलनात्मिका वर्तते इयं पत्रिका। अस्यां पत्रिकायां प्रायः ५० शोधपत्राणि सङ्कलितानि वर्तन्ते। इयं च शोधपत्रिका महापण्डिताय राहुलसांकृत्यायनाय समर्पिता वर्तते। अवसरेऽस्मिन् सम्पादकेन डा. प्रफुल्ल-गडपालेन पत्रिकायाः वैशिष्ट्यं प्रतिपादितम्। अयञ्च अङ्कः 'बौद्धमिश्रितसंस्कृतसाहित्यस्य वैश्विकसन्देशः' इति विशेषाङ्कत्वेन प्रकाशितः।

## पत्रिका-लोकार्पणम्



रघुनाथवार्तावल्याः लोकार्पणस्य किञ्चन दृश्यम्

२८.०१.२०१९ तमे दिनाङ्के व्याकरणविभागीय-द्विदिवसीय-अन्ताराष्ट्रिय-सङ्गोष्ठ्याः उद्घाटनसत्रं प्रवृतम्। अस्मिन् अवसरे परिसरीयवार्तापत्रिकायाः रघुनाथ-वार्तावल्याः नवमाङ्कस्य लोकार्पणमतिथिभिः सम्पादकैश्च विहितम्।

अयञ्च अङ्कः संस्कृत-सप्ताहोत्सव-विशेषाङ्करूपेण प्रकाशितः वर्तते यत्र परिसरीयाः अन्याः वार्ताः प्रकाशिताः सन्ति। एवमेव विशेषपृष्ठे श्रावणीपर्वणः महत्त्वं प्रतिपादितमस्ति। साहित्यखण्डेऽपि किञ्चन अभिनवसाहित्यं प्रकाशितं राराजते। अस्याः मुखपृष्ठे परिसरस्य नवीनभवनस्य चित्रं समङ्कितं शोभते।

## सम्पन्ना राष्ट्रिया कविगोष्ठी




कविगोष्ठ्याम् अध्यक्षीयं प्रस्तुवन् प्रो. के.बी. सुब्बरायुडुः


परिसरे १९.०२.२०१९ तमे दिनाङ्के आधुनिक-संस्कृत-साहित्य-संसाधन-केन्द्रपक्षतः वेदविभागीय-सङ्गोष्ठ्यवसरे राष्ट्रिया संस्कृतकविगोष्ठी आयोजिता। परिसर-प्राचार्यस्य आध्यक्ष्ये सम्पन्नायाम् अस्यां कविगोष्ठ्यां प्रो. बनमालीबिश्वालः, डा. शैलेन्द्रप्रसाद-उनियालः, डा. मुकेशकुमारः, डा. आशुतोषगुप्तः, डा. वीरेन्द्रसिंहबर्त्वाल-प्रभृतयः कवयः संस्कृत-हिन्दी-गढवाली-भाषासु स्वरचितानि काव्यानि प्रस्तुतवन्तः।

प्रायः सर्वैरेव कविभिरत्र पुलवामाऽऽक्रमणे हुतात्मनां श्रद्धाञ्जलौ स्वकाव्यानि प्रस्तुतवन्तः। केचन कवयः हिन्दीभाषया गढवालीभाषया च प्रस्तुतसन्दर्भे काव्यपाठं कृतवन्तः।


## अन्तःपरिसरीय-नाट्यस्पर्धायां भागग्रहणम्

केरलराज्ये प्रतिष्ठिते राष्ट्रियसंस्कृतसंस्थानस्य गुरुवायूर-परिसरे मार्च-मासस्य ०८ दिनाङ्कतः ११ दिनाङ्कपर्यन्तम् आयोजितायां षोडश-अन्तःपरिसरीयनाट्यस्पर्धायां श्रीरघुनाथकीर्तिपरिसरस्य नाट्यदलेन श्रीहर्षप्रणीता 'रत्नावली'-नाटिका सफलतया प्रस्तुता।

अस्मिन् महोत्सवे परिसरस्य शास्त्रि-तृतीयवर्षस्य छात्रः दुर्गेशः प्रथमं स्थानम्, आचार्य-प्रथमवर्षस्य छात्रः रोहितकुमारः द्वितीयं स्थानम्, शास्त्रितृतीयवर्षस्य छात्रा प्राची च तृतीयं स्थानम् अवाप्नोत्। नाट्यदलस्य मार्गदर्शकत्वेन परिसरीय-प्राध्यापकौ डा. शैलेन्द्रप्रसाद-उनीयालः, डा. नीतेशद्विवेदी च भागं गृहीतवन्तौ। बाह्यमार्गदर्शकत्वेन डा. राकेशभट्टः अपि तत्र समुपस्थितः।



भरतवाक्यं प्रस्तुवन्तः कुशीलवाः



रत्नावली-नाटिकामभिनयन्तः कुशीलवाः



संस्थानकुलपतिद्वारा प्रमाणपत्रवितरणस्य किञ्चन दृश्यम्

## गणतन्त्रदिवसः समायोजितः

परिसरे जनवरी-मासस्य २६तमे दिनाङ्के महता उल्लासेन गणतन्त्र-दिवसः समायोजितः। अवसरेऽस्मिन् परिसरप्रतिनिधिरूपेण प्राचार्यः प्रो. के.बी. सुब्बरायुडुमहोदयः ध्वजामुत्तोलितवान्। ध्वजारोहणं तद्वन्दनञ्च विधाय सभां सम्बोधयता तेन उक्तं यद् अस्मिन् ६९ तमे गणतन्त्रदिवसे सर्वे वयं स्व-स्वक्षेत्रे स्व-स्वकार्याणि निष्ठया सम्पादयामः। संविधानस्य निर्माणे अस्माकं पूर्वजानां महद् योगदानमासीत्। अतः अस्माभिः तस्य मानः रक्षणीयः। अनन्तरं परिसरच्छात्रैः गणतन्त्रदिवसमुपलक्ष्य देशभक्तिगीतं भाषणं काव्यपाठञ्च प्रस्तुतम्। एतदवधौ प्रो. बनमालीबिश्वालः, डा. प्रफुल्लगडपालः, डा. शैलेन्द्रप्रसाद-उनियालः, डा. अरविन्दगौरः, श्रीपङ्कजकोटियालः, श्रीश्रीओमशर्मादिभिः परिसर-प्राध्यापकैः छात्राणां कृते ज्ञानवर्धकं सन्मार्गप्रेरकं भाषणं प्रदाय छात्राणां मार्गदर्शनं कृतम्।



गणतन्त्रदिवसोत्सवस्य किञ्चन दृश्यम्

## समायोजितः मातृभाषादिवसः

२१.०२.२०१९ तमे दिनाङ्के परिसरे मातृभाषा-दिवसः समायोजितः। सम्पूर्णे विश्वे मातृभाषादिवसस्यारम्भः बाँग्लादेशे आन्दोलनकारणात् अभवदिति तथ्यं सर्वविदितम्। मातृभाषादिवसावसरे गढवालीभाषायाः प्रचार-प्रसारार्थं संगठितायाः आखरसमितेः अध्यक्षः श्रीसन्दीपरावतः विशिष्टाथितिरूपेण उद्बोधितवान् तथा गढवालीभाषायां काव्यपाठं च कृतवान्। कार्यक्रमाध्यक्षेण प्रो. सुब्बरायुडु-महोदयेन उक्तं यत् छात्राणां कृते नैकभाषाणां ज्ञानमावश्यकं भवति तथा मातृभाषायाः प्रयोगस्तु तैः अवश्यं कर्तव्यः।


एवमेव कार्यक्रमेऽस्मिन् प्रोः बनमालीविश्वाल-डा. प्रफुल्लगडपाल-डा. शैलेन्द्र-प्रसाद-उनीयाल-डा. अरविन्दगौर-डा. मुकेश शर्म-डा. नीतेशद्विवेदि-श्रीश्रीओमशर्म-श्रीपङ्कजकोटियालादयः तत्तद्विभागाध्यक्षाः परिसरप्राध्यापकाश्च समुपस्थिताः आसन्। एतेषु कैश्चित् प्राध्यापकैः छात्रैश्च मातृभाषा-प्रयोगविषये स्वे-स्वे विचाराः प्रकटीकृताः। ततः कैश्चिच्च स्वमातृभाषायां काव्यपाठोऽपि प्रस्तुतः। परिसरस्य हिन्दीप्राध्यापकेन डा. वीरेन्द्रसिंहबर्त्वालेन कार्यक्रमस्य सञ्चालनं कृतम्।





श्रीसन्दीपरावतः अभिनन्द्यते

## प्राचार्यदैनन्दिनी

| | |
|---|---|
| २२.०१.२०१९ | जम्मूपरिसरे राष्ट्रियसङ्गोष्ठ्यां मुख्यातिथित्वं विहितम्। |
| १३.०२.२०१९ | दिल्लीमुख्यालये उपवेशने भागग्रहणम्। |
| ०८-१०.०३.२०१९ | गुरुवायूर-परिसरे अन्तःपरिसरीयनाट्यस्पर्धायाम् उपस्थितिः। |
| ३१.०३.२०१९ | दिल्लीमुख्यालये उपवेशने भागग्रहणम्। |
| २८-२९.०१.२०१९ | श्रीरघुनाथकीर्ति-परिसरे व्याकरण-विभागीयसङ्गोष्ठ्याम् उद्घाटन-समापनसत्रयोः आध्यक्ष्यं विहितम्। |
| ३०-३१.०१.२०१९ | श्रीरघुनाथकीर्ति-परिसरे साहित्य-विभागीयसङ्गोष्ठ्याम् उद्घाटन-समापनसत्रयोः आध्यक्ष्यं विहितम्। |
| ०१-०२.०२.२०१९ | श्रीरघुनाथकीर्ति-परिसरे ज्यौतिष-विभागीयसङ्गोष्ठ्याम् उद्घाटन-समापनसत्रयोः आध्यक्ष्यं विहितम्। |
| ०३-०४.०२.२०१९ | श्रीरघुनाथकीर्ति-परिसरे आधुनिक-विभागीयसङ्गोष्ठ्याम् उद्घाटन-समापनसत्रयोः आध्यक्ष्यं विहितम्। |
| १८-१९.०२.२०१९ | श्रीरघुनाथकीर्ति-परिसरे वेद-विभागीयसङ्गोष्ठ्याम् उद्घाटन-समापनसत्रयोः आध्यक्ष्यं विहितम्। |
| २०-२१.०२.२०१९ | श्रीरघुनाथकीर्ति-परिसरे न्याय-विभागीयसङ्गोष्ठ्याम् उद्घाटन-समापनसत्रयोः आध्यक्ष्यं विहितम्। |
| २२-२३.०२.२०१९ | श्रीरघुनाथकीर्ति-परिसरे वेदान्त-विभागीयसङ्गोष्ठ्याम् उद्घाटन-समापनसत्रयोः आध्यक्ष्यं विहितम्। |
| २८.०१.२०१९ | श्रीरघुनाथकीर्ति-परिसरे व्याकरण-विभागीयविशिष्टव्याख्यानमालायाम् आध्यक्ष्यं विहितम्। |
| ३०.०१.२०१९ | श्रीरघुनाथकीर्ति-परिसरे साहित्य-विभागीयविशिष्टव्याख्यानमालायाम् आध्यक्ष्यं विहितम्। |
| ०१.०२.२०१९ | श्रीरघुनाथकीर्ति-परिसरे ज्यौतिष-विभागीयविशिष्टव्याख्यानमालायाम् आध्यक्ष्यं विहितम्। |
| ०३.०२.२०१९ | श्रीरघुनाथकीर्ति-परिसरे आधुनिक-विभागीयविशिष्टव्याख्यानमालायाम् आध्यक्ष्यं विहितम्। |
| १८.०२.२०१९ | श्रीरघुनाथकीर्ति-परिसरे वेद-विभागीयविशिष्टव्याख्यानमालायाम् आध्यक्ष्यं विहितम्। |
| २२.०२.२०१९ | श्रीरघुनाथकीर्ति-परिसरे वेदान्त-विभागीयविशिष्टव्याख्यानमालायाम् आध्यक्ष्यं विहितम्। |
| २१.०२.२०१९ | विश्वमातृभाषादिवसकार्यक्रमे आध्यक्ष्यम्। |





## परिसरीय-विदुषां शैक्षिकोपलब्धयः गतिविधयश्च

**१. प्रो. बनमाली बिश्वालः**

- ०७.०१.२०१९ दिनाङ्कात् ०९.०१.२०१९ दिनाङ्कं यावत् सावित्रीबाई-फुले-पुणे-विद्यालये आयोजितायां विशिष्टव्याख्यानमालायाम् आधुनिक-संस्कृत-साहित्यमधिकृत्य पञ्च व्याख्यानानि प्रदत्तानि।
- १०.०१.२०१९ दिनाङ्कात् १२.०१.२०१९ दिनाङ्कं यावत् सावित्रीबाई-फुले-पुणे-विद्यालये आयोजितायां त्रिदिनात्मिकायां राष्ट्रियसङ्गोष्ठ्याम् १०.०१.२०१९ तमे दिनाङ्के एकस्मिन् सत्रे आध्यक्ष्यं निर्व्यूढम्। एवमेव तत्र ११.०१.२०१९ तमे दिनाङ्के एकस्मिन् विशिष्टे सत्रे विशिष्टव्याख्यानं च प्रस्तुतम्।
- १८.०१.२०१९ तमे दिनाङ्के शैक्षिक-विकास-केन्द्रेण (मानवसंसाधनविकासमन्त्रालयाधीनेन) प्रयागराजस्थे ईश्वरशरण-स्नातकोत्तरमहाविद्यालये समायोजितायां शोधप्रविधिविषयिण्यां कार्यशालायां विशिष्ट-व्याख्यानद्वयं प्रस्तुतम्।
- राष्ट्रियसंस्कृतसंस्थानस्याङ्गभूते देवप्रयागस्थे श्रीरघुनाथकीर्तिपरिसरे २८.०१.२०१९ तः २९.०१.२०१९ दिनाङ्कं यावत् 'समासशक्तिसिद्धान्ते परावर्तनबिन्दवः' इति विषयमधिकृत्य प्रवृत्तायां व्याकरणविभागीय-अन्ताराष्ट्रिय-सङ्गोष्ठ्यां संयोजकत्वं, सत्राध्यक्ष्यञ्च निर्व्यूढम्, तत्र एकस्मिन् सत्रे शोधपत्रमपि प्रस्तुतम्।
- श्रीरघुनाथकीर्तिपरिसरे ३०.०१.२०१९ तः ३१..०१..२०१९ दिनाङ्कं यावत् सम्पन्नायां 'संस्कृतसाहित्ये बौद्धपरम्पराया योगदानम्' इति शीर्षकान्वितायां साहित्यविभागीय-द्विदिवसीयान्ताराष्ट्रिय-सङ्गोष्ठ्यां सत्राध्यक्ष्यं निर्व्यूढम्। तत्र 'ओगेटिपरीक्षिच्छर्मणः यशोधरामहाकाव्यमधिकृत्य शोधपत्रञ्च प्रस्तुतम्।
- श्रीरघुनाथकीर्तिपरिसरे १८.०२..२०१९. तः २३.०२.२०१९ दिनाङ्कं यावत् सम्पन्नायां वेदविभागीय-राष्ट्रिय-सङ्गोष्ठ्यां सत्राध्यक्ष्यं निर्व्यूढम्, तत्र शोधपत्रं च प्रस्तुतम्।
- श्रीरघुनाथकीर्तिपरिसरे २१.०२..२०१९. तः २३.०२.२०१९ दिनाङ्कं यावत् सम्पन्नायां न्यायविभागीय-राष्ट्रिय-सङ्गोष्ठ्यां सम्पूर्तिसत्रे विशिष्टातिथित्वेन उद्बोधनं विहितम्।
- श्रीरघुनाथकीर्तिपरिसरे २२.०२..२०१९. तः २३.०२.२०१९ दिनाङ्कं यावत् सम्पन्नायां वेदान्तविभागीय-राष्ट्रिय-सङ्गोष्ठ्याम् उद्घाटनसत्रे विषय-प्रवर्तनम्।
- २५.०२.२०१९ तः १.३.२०१९ दिनाङ्कपर्यन्तं सोमनाथसंस्कृतविश्वविद्यालये प्रवर्तितायां शिक्षासन्दर्भकार्यशालायां आधारपुरुषरूपेण भागग्रहणं कृतवान्।
- १६.०३.२०१९ तः १७.०३.२०१९ दिनाङ्कं यावद् लखनऊ-विश्वविद्यालये प्रवर्तितायां राष्ट्रियसङ्गोष्ठ्याम् आधारपुरुषरूपेण भागग्रहणं कृतवान्।
- २४.०३.२०१९ तः २५.०३.२०१९ दिनाङ्कं यावद् राष्ट्रियसंस्कृतसंस्थानस्याङ्गभूते लखनऊ-परिसरे प्रवर्तितायां व्याकरणविभागीयराष्ट्रियसङ्गोष्ठ्याम् मुख्यवक्तृरूपेण व्याख्यानं दत्तवान्।
- २६.०३.२०१९ तः २७.०३.२०१९ दिनाङ्कं यावद् राष्ट्रियसंस्कृतसंस्थानस्याङ्गभूते लखनऊ-परिसरे प्रवर्तितायां बौद्धदर्शनविभागीय-राष्ट्रियसङ्गोष्ठ्याम् उद्घाटनसत्रे सारस्वतातिथिरूपेण भागग्रहणं कृतवान्।
- २७.०३.२०१९ तः २८.०३.२०१९ दिनाङ्कं यावत् राष्ट्रियसंस्कृतसंस्थानस्याङ्गभूते लखनऊ-परिसरे प्रवर्तितायां साहित्यविभागीय-राष्ट्रियसङ्गोष्ठ्याम् विशिष्टातिथिरूपेण भागग्रहणं कृतवान्।
- एतदवधौ कथासरित्-पत्रिकायाः अष्टाविंशाङ्कस्य सम्पादनं कृतवान्। तत्र च काश्चन मौलिक्यः अनूदिताश्च कथाः प्रकाशिताः अभवन्।
- पद्यबन्धाया त्रयोदशाङ्कस्य मुख्यसम्पादकरूपेण सम्पादनं कृतवान्। तत्र च काश्चन मौलिक्यः अनूदिताश्च कविताः प्रकाशिताः अभवन्।
- प्रयागस्थे राष्ट्रियसंस्कृतसंस्थानाङ्गभूते श्रीगङ्गानाथझापरिसरे तन्मार्गदर्शने द्वौ शोधच्छात्रौ शोधप्रबन्धान् प्रस्तुतवन्तौ।
- नेहरुग्रामभारती-विश्वविद्यालयस्य कस्यचित् शोधप्रबन्धस्य बाह्यपरीक्षकरूपेण मूल्याङ्कनं कृतवान्।
- बडौदा-विश्वविद्यालयस्य कस्यचित् शोधप्रबन्धस्य बाह्यपरीक्षकरूपेण मूल्याङ्कनं कृतवान्।

**२. डा. कृपाशङ्करशर्मा–**

- राष्ट्रियसंस्कृतसंस्थानस्य श्रीरघुनाथकीर्तिपरिसरे साहित्यविभागीयान्ताराष्ट्रियसङ्गोष्ठ्यां ३०.०१.१९ दिनाङ्के पत्रवाचनं कृतम्।
- राष्ट्रियसंस्कृतसंस्थानस्य श्रीरघुनाथकीर्तिपरिसरे ज्यौतिषविभागीयान्ताराष्ट्रियसङ्गोष्ठ्यां ०१.०२.१९ दिनाङ्के पत्रवाचनं कृतम्।
- राष्ट्रियसंस्कृतसंस्थानस्य श्रीरघुनाथकीर्तिपरिसरे आधुनिकविषयविभागीयराष्ट्रियसङ्गोष्ठ्यां ०३.०२.१९ दिनाङ्के पत्रवाचनं कृतम्।
- राष्ट्रियसंस्कृतसंस्थानस्य श्रीरघुनाथकीर्तिपरिसरे वेदविभागीयराष्ट्रियसङ्गोष्ठ्यां १८.०२.१९ दिनाङ्के पत्रवाचनं सत्राध्यक्षतां च कृतवान्।

**३. डॉ. प्रफुल्लगडपालः–**

- ०५.०१.२०१९ तः २५.०१.२०१९ दिनाङ्कपर्यन्तं समायोजिते हरियाणाप्रदेशस्य सोनीपतसमीपस्थे खानपुरीये-भगतफुलसिंहमहिला-विश्वविद्यालये समायोजिते पुनश्चर्या-पाठ्यक्रमे भागग्रहणम्।

- नांदेडस्थ-स्वामिरामानन्दतीर्थमराठवाडाविश्वविद्यालये पालिविभागे बोर्ड ऑफ स्टडीज इत्यस्य सदस्य: नियुक्त:।
- ३०.०१.२०१९ तमे दिनाङ्के साहित्यविभागीय-विशिष्टव्याख्यानावसरे एतेन सम्पादितस्य 'पालि-संवादो' विश्वस्य प्रप्रथमा पालिपत्रिका लोकार्पिता अभवत्।
- २८.०१.२०१९ तमे दिनाङ्के वेदान्तविभागीयाया: राष्ट्रिय-सङ्गोष्ठ्या: उद्घाटनसत्रावसरेऽनेन सम्पादिताया: 'बौद्धमिश्रितसंस्कृतसाहित्यस्य वैश्विक: सन्देश:' इत्यभिधानाया: साहित्यविभागस्य 'साहिती'-पत्रिकाया: द्वितीयाङ्कस्य लोकार्पणमभूत्।
- राष्ट्रियसंस्कृतसंस्थानमुख्यालये एतन्मार्गदर्शने एक: शोधच्छात्र: शोधप्रबन्धं प्रस्तुतवान्।
- राष्ट्रियसंस्कृतसंस्थानस्य देवप्रयागस्थे श्रीरघुनाथकीर्तिपरिसरे ३०.०१.२०१९ त: ३१.०१.२०१९ दिनाङ्कं यावत् प्रवृत्तायां साहित्यविभागीय-द्विदिवसीयान्ताराष्ट्रिय-सङ्गोष्ठ्यां संयोजकत्वं विहितम्। अस्या: सङ्गोष्ठ्या: एकस्मिन् सत्रे शोधपत्रं प्रस्तुतम् अपरे च कस्मिंश्चित् सत्रे अनेन सत्राध्यक्ष्यं निर्व्यूढम्।
- श्रीरघुनाथकीर्ति-परिसरे दिनाङ्क ०३ फरवरी, २०१९ त: ०४ फरवरी, २०१९ यावत् 'लोक संस्कृति का इतिहास से अन्त:सम्बन्ध' शीर्षकमधिकृत्य सम्पन्नायाम् आधुनिकविषयविभागीय-द्विदिवसीयान्ताराष्ट्रिय-सङ्गोष्ठ्याम् एकस्मिन् सत्रे सत्राध्यक्ष्यं निर्व्यूढम्।

### ४. डा. शैलेन्द्रप्रसाद-उनियाल:-

- राष्ट्रियसंस्कृतसंस्थानस्य श्रीरघुनाथकीर्तिपरिसरे व्याकरणविभागीयान्ताराष्ट्रियसङ्गोष्ठ्यां 'वेदालोके समासशक्तिविचार:' इत्यस्मिन् विषये २८.०१.१९ दिनाङ्के पत्रवाचनं कृतवान्।
- श्रीरघुनाथकीर्तिपरिसरे साहित्यविभागीयान्ताराष्ट्रियसङ्गोष्ठ्यां ३०.०१.१९ दिनाङ्के 'दिव्यावदाने पाणिग्रहणविचार:' इति शीर्षकाख्यं पत्रवाचनं कृतवान्।
- श्रीरघुनाथकीर्तिपरिसरे ज्यौतिषविभागीयान्ताराष्ट्रियसङ्गोष्ठ्यां 'वास्तुकर्मणि शिलान्यासविमर्श:' इति विषये ०१.०२.१९ दिनाङ्के पत्रवाचनं कृतवान्।
- श्रीरघुनाथकीर्तिपरिसरे आधुनिकविषयविभागीयराष्ट्रियसङ्गोष्ठ्यां 'वैदिकवाङ्मय में संस्कृति का स्वरूप-विमर्श' इति विषये ०३.०२.१९ दिनाङ्के पत्रवाचनं कृतवान् एकस्य सत्रस्य सञ्चालनमपि अकरोत्।
- श्रीरघुनाथकीर्तिपरिसरे वेदविभागीयराष्ट्रियसङ्गोष्ठ्यां 'वेदेषु देवतावाद:' इति विषये १८.०२.१९ दिनाङ्के पत्रवाचनं संयोकत्वं च कृतवान्।
- श्रीरघुनाथकीर्तिपरिसरे न्यायविषयविभागीयराष्ट्रियसङ्गोष्ठ्यां 'धर्मपुरुषार्थविमर्श:' इति विषये २०.०२.१९ दिनाङ्के पत्रवाचनं कृतवान्।
- श्रीरघुनाथकीर्तिपरिसरे वेदान्तविभागीयराष्ट्रियसङ्गोष्ठ्यां 'मोक्षसाधनसामग्रीविवेचनम्' इति विषये २२.०२.१९ दिनाङ्के पत्रवाचनं कृतवान्।
- राष्ट्रियसंस्कृतसंस्थानस्य गुरुवायूरपरिसरे षोडश संस्कृतनाट्यमहोत्सवे ८-१०.०३.२०१९ इत्यवधौ परिसरीयनाटकदलस्य मार्गदर्शकरूपेण भागग्रहणम्।

### ५. डा. नितेशकुमारद्विवेदी-

- राष्ट्रियसंस्कृतसंस्थानस्य श्रीरघुनाथकीर्तिपरिसरे २८.१.२०१९त: २९.१.२०१९ दिनाङ्कपर्यन्तं समायोजितायाम् अन्ताराष्ट्रिय-व्याकरणविभागीय-सङ्गोष्ठ्यां 'भूषणसारदिशा समासार्थविचार:' इति शीर्षकान्वितं शोधपत्रं प्रस्तुतम् तत्र च सत्रसञ्चालनं विहितम्।
- श्रीरघुनाथकीर्तिपरिसरे ३०.१.२०१९त: ३१.१.२०१९ दिनाङ्कपर्यन्तं 'संस्कृतसाहित्ये बौद्धपरम्पराया: योगदानम्' इति विषयमधिकृत्य समायोजितायामन्ताराष्ट्रियायां साहित्यविभागीयसङ्गोष्ठ्यां 'पाणिनीयव्याकरणे बौद्धवैयाकरणानां योगदानम्' इति शीर्षकान्वितं शोधपत्रं प्रस्तुतम्, तत्र च कस्मिंश्चित् सत्रे सञ्चालनमपि कृतम्।
- श्रीरघुनाथकीर्तिपरिसरे १.२.२०१९त: २.२.२०१९ दिनाङ्कपर्यन्तं 'देववास्तुविमर्श:' इति विषयमधिकृत्य समायोजितायाम् अन्ताराष्ट्रिय-ज्योतिषविभागीयसङ्गोष्ठ्यां 'वास्तुशास्त्रे मूर्तिकला' इति शीर्षकान्वितं शोधपत्रं प्रस्तुतम् कस्मिंश्चित् च सत्रे सञ्चालनमपि विहितम्।
- श्रीरघुनाथकीर्तिपरिसरे ३.२.२०१९त: ४.२.२०१९ दिनाङ्कपर्यन्तं 'लोक संस्कृति का इतिहास से अन्त:सम्बन्ध' इति विषयमधिकृत्य प्रवर्तमाणायाम् आधुनिकविभागीयराष्ट्रियसङ्गोष्ठ्यां 'हिन्दी साहित्य में संस्कृति का महत्त्व' इति शीर्षकान्वितं शोधपत्रं प्रस्तुतम् एकस्मिन् सत्रे च सञ्चालनं कृतम्।
- श्रीरघुनाथकीर्तिपरिसरे २०.२.२०१९त: २१.२.२०१९ दिनाङ्कपर्यन्तं 'वैशेषिकसूत्रोपस्कारस्थ-विशेषविचाराणां परिशीलनम्' इति विषयमधिकृत्य प्रवर्तमानायाम् न्यायविभागीयराष्ट्रियसङ्गोष्ठ्यां 'न्यायव्याकरणयो: अभावपदार्थविचार:' इति शीर्षकान्वितं शोधपत्रं प्रस्तुतम् एकस्मिन् च सत्रे सत्रसञ्चालनदायित्वं निर्व्यूढम्।
- श्रीरघुनाथकीर्तिपरिसरे १८.२.२०१९त: १९.२.२०१९ दिनाङ्कपर्यन्तं 'वेदेषु देवतावाद:' इति विषयमधिकृत्य प्रवर्तमानायां वेदविभागीयराष्ट्रियसङ्गोष्ठ्यां 'व्याकरणशास्त्रे देवताविमर्श:' इति शीर्षकान्वितं शोधपत्रं प्रस्तुतम्, एकस्मिन् च सत्रे सञ्चालकदायित्वं निर्व्यूढम्।
- श्रीरघुनाथकीर्तिपरिसरे २२.२.२०१९त: २३.२.२०१९ दिनाङ्कपर्यन्तं 'मोक्षसाधनसामग्रीविमर्श' इति विषयमधिकृत्य प्रवर्तमानायां वेदान्तविभागीय-राष्ट्रियसङ्गोष्ठ्यां 'वाक्यपदीये शब्दब्रह्मनिरूपणम्' इति शीर्षकान्वितं शोधपत्रं प्रस्तुतम् सत्रसञ्चालकत्वं च निर्व्यूढम् ।
- राष्ट्रियसंस्कृतसंस्थानस्य केरलस्थ-गुरुवायूरपरिसरे ०८.०३.२०१९त: १०.३.२०१९पर्यन्तं समायोजितायाम् अन्त:परिसरीयसंस्कृतनाट्यस्पर्धायां रत्नावली इति रूपकस्य मार्गदर्शकत्वं सम्पादितम्।

# भग्नाः स्वप्नाः
## (Shattered Dreams)

आंग्लमूलम्-प्रो. सुशीलकुमारशर्मा
संस्कृतानुवादः-प्रो. बनमालीबिश्वालः

I आलिङ्गिताः मया मम स्वप्नाः
त्वया परिवर्तितास्ते साक्षाद् वास्तवेन
स्वप्ना इव किन्तु ते दूरगाः।
आतङ्कितः क्वचित् स्वप्नविषयेऽहं
क्वचित्पुनर्वास्तविकतया।
तथाप्यनुभवितुमक्षमः
ते च सन्तीदानीमेकः
ते चासन् द्वावतीते पुनः
क्लिश्यति मां तेषां भविष्यच्च।

II मत्स्वप्नानां सौधमहं निरमाम
मरुभूमेर्वालुकास्तूपेषु।
मत्कल्पना निरपतदधः
यथा विश्ववाणिज्यस्य केन्द्रम्।
केचित्स्वप्नाः संलग्नाः मे करतले
मेघपूर्णरात्रौ यथा संलग्नास्तारकाः।
अहं तु संगृह्णन्नस्मि स्खलित-रेतांसि
यथा बुसः संगृह्णाति प्रमाणानि लादेन-विरोधे।
मया स्वप्नास्तरङ्गायिताः
कल्पनायाः सौधं विनिर्मातुम्
चटका निर्माति यथा स्वशावकाश्रययोग्यं नीडम्।
एतदासीत् प्रकाशभवनम्
भग्नतट-भ्राम्यमाण-नौकानां च कृते
विकीर्णाश्च त्रिकालाबाधिते ह्यन्तसागरे।
कमहं दण्डयिष्यामि
मम पञ्चभुजामाक्रमितुम्?
किं प्रमाणं वाञ्छाम्यहं
स्वकीय-विरोधे?

III ते तु मां ब्रुवन्तः सन्ति
मत्स्वप्ने वस्तूनि द्रष्टुम्
नियमिततया
तथा चोल्लेखितुं
पशून्, नदीः, पर्वतान्–
नरान्, नारीः, बालान्–बालकांश्च बालिकाश्च पुनः
वृक्षान्, नक्षत्राणि, उपग्रहांस्तथा
जीवितांश्च मृतान्

I I have embraced my dreams
You've converted them into reality
Which is as far away as were the dreams.
Sometimes I panicky about the dreams
And Sometimes about the reality.
I still don't realize that
They are one in the present,
They were two in the past,
Their future troubles me.

II I have built the castles of my dream
On the sand dunes of a desert.
My imagination came falling down
Like the World trade Centre.
Some dreams got stuck on my palm
Like stars on a night full of clouds.
I have been collecting the peeling sand
Like Bush gathering evidences against Laden.
I had waved my dreams
To build the castle of imaginations
Like a weaver does to shelter its chicks.
It was lighthouse
To the wandering barks of broken selves
Scattered on the ocean of timelessness.
Whom should I punish
For attacking my Pentagon?
What evidence do I need
Against myself?

III They have been telling me
To watch things in my dreams
On a regular basis
And to keep a record
Of the animals, rivers, mountains.
Of the men, women, children – girls as well as boys
Of the trees, stars and planets
Of the living and the dead

मच्छय्यासहभागिन:
अधस्तारकाया:।
मया तानि गोपितानि तत्तटबन्धेषु
प्रदर्शनीकर्तुं तानि यथासमयेन
उचिते च स्थाने।
यथा कश्चिदैन्द्रजालिक:।
अहञ्च प्रथयिष्यामि
मद्वस्तूनि समर्जितुं दैनिकाश्च भृती:।
सेत्स्यति सफलता मे यावन्न प्रदर्शनेन
किन्तु तावन्मात्रगोपनेन।
मम कर्णौ श्रवणान्निवृत्तौ
मम नेत्रे दर्शनान्निवृत्ते
मम जिह्वा भाषणान्निवृत्ता
मम स्वप्नान् सज्जीकरोम्यहम्
यथाकालं तान् प्रकाशयितुम्
उचित-समये
उचितद्रष्टारम्।

That share bed with me
under the stars.
I have kept them hidden in their embankments
To make a show at proper time
And at a proper place.
Like a juggler does.
I too shall spread
My wares to earn my wages
My success will lie not in revealing
This much but in concealing that much.
My ears have stopped listening
My eyes have stopped watching
My tongue has stopped speaking
I am Just arranging my dreams
To reveal them at a proper time
At a proper place
To a proper seer.

## ।। लौहपुरुषपटेल: ।।

डा. शैलेन्द्रप्रसाद-उनियाल:

पटेलो बल्लभो भ्राता पुरुषो लौहसंज्ञक:।
राष्ट्रैक्यार्थं समुन्नत्यै कृतभूरिपरिश्रम:।।१।।

उपप्रधानमन्त्री च गृहमन्त्रीति संज्ञक:।
कार्याणि कृतवान् यस्तु तस्मै श्रद्धाञ्जलि: शुभा।।२।।

एकतादिवसोऽस्माभिर्मन्यते तेन हेतुना।
सद्भावना विकासश्च भूयादैक्यं महच्छुभम्।।३।।

दु:खनाश: सुखावाप्तिरारोग्यं विशदा मति:।
सर्वत्र शुभमाङ्गल्यं भूयाद् भारतभारते ।।४।।

पटेलजन्मदिवसे भारतं नु रत्नायते।
भारते भारती शुभ्रा लक्ष्मीश्चापि प्रसीदति।।५।।

रत्नं भारतनामकं सुमहत्प्राप्तं स्वकार्यैश्च यै:
तेषामद्य हि मन्यते हि हिमवद्देशैकतार्ह: शुभ:।
वन्दे भारतरत्ननामकमणिं लौहाख्यभूषं जनम्
शौर्येणास्त्यभवच्च कीर्तिरतुला ख्यातिर्हि येषां शुभा।।६।।

पं. मुरलीधरशास्त्रीविरचितम्

## ।।श्रीबदरीकाश्रमेवैचित्र्यम्।।

(सं.) विनोदपण्डित:

विलोक्य भार्यामतिचञ्चलां हि गतां धनाढ्ये नगरे विदेशे।
पुर्य्यां बदर्य्यां खलु भिक्षुकाणां मध्ये हरि: प्रस्तरतां गतो हि।।1।।

दृष्ट्वा हरेस्तत्र विचित्ररूपं नरस्य नारायणनारदोऽपि।
अन्येऽपि देवा: व्यथितास्तदानीं सर्वेऽपि पाषाणमया: बभूवु:।।2।।

ज्ञात्वा हरिं तत्र शिलामयत्वं भक्तोद्धव: श्रीधनद: कुबेर:।
सन्दर्शयन्तौ निजस्वामिभक्तिं द्वावेव धनुत्वमुपागतौ हि।।3।।

देवाधिदेव: खलु शङ्करोऽपि दृष्ट्वा हरौ तत्र विचित्रितां तु।
विक्षिप्ततां प्राप्य निजे शरीरे श्रीनीलकण्ठाख्यमवाप शैलम्।।4।।

ब्रह्मा स्वयंभू चतुराश्च भूत्वा हरेस्तत्र हसन्स्वरूपम्।
गत्वोत्तस्यां दिशि दु:खितस्सन् सम्पादयामास शिर: स्वकीयम्।।5।।

वह्निस्तु तत्रैव हरिं विलोक्य ग्रावत्वरूपेण सदेवनाभि:।
रुदन् सुदु:खेन सुदु:सहेन तदोष्णवारित्वमवाप शीघ्रम्।।6।।

इन्द्र: सुरेन्द्रो वसवश्च वेदा: पाषाणमूर्तौ तु हरिं विलोक्य।
मत्वा स्वकीयेषु निराश्रयत्वं सर्वे जनत्वे परिवर्तिता हि ।।7।।

अपेक्ष्य देवेषु हि प्रस्तरत्वं जना: पुरस्थास्तु विचारहीना:।
निरंकुशाश्च मदोद्धताश्च जाता: सदा स्वार्थपरायणा हि।।8।।

































Raghunathavartavali : Quarterly News Bulletin of Shri Raghunath Kirti Campus of Rashtriya Sanskrit Sansthan, Published by the Principal fo
Shri Raghunath Kirti Campus, Devaprayag, Uttarakhand & Printed at D.V. Printers, 97-U.B., Jawahar Nagar, Delhi-110007